Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

ACC. NO. NEW 241 OLD 2699

FOLIO 1 to 3

TITLE

Lalitā-sahasra-nāma
Tātparya-vivaraṇa

॥ श्रीमत्कृष्णवधूत पंडित कृतो पदार्थ सागराख्य तर्क-
संग्रह व्याख्यानं प्रारभ्यतेमया ॥

श्रीगुरुभ्योनमः ॥ वेदव्यासगुरूपास्य मुपासे वासवी सुतं ॥ तर्क संग्रह तात्पर्य प्रचिकासंयिषुःसुखं ॥१॥ ग्रंथस्य निर्विघ्नसमाप्त्यर्थं मंगल माचरति ॥ नि धायेति ॥ हृदये विश्वेश निष्ठा धेयता निरूपिताधिकरणतास्वविषयक ज्ञान जनकता संबंधेन विश्वेशं ध्यात्वेत्यर्थः ॥ ननुग्रंथस्य प्रतिज्ञोत्तरकालिक कृति विषयत्वेन प्रतिज्ञावाक्य घटकलङंतः प्रयोगः कथमितिचेन्न ॥ वर्तमान सामीप्ये वर्तमानवद्वेति अनुज्ञासनात्प्रतिज्ञा व्यवहितोत्तर कृतिविषय तयालट् प्रयोगात् ॥ प्रतिज्ञातु जिज्ञासूनां शिष्याणां स्वकृत ग्रंथ श्रवणादर जननाय ॥ आदरस्तु वक्ष्यमाण विषय सूचनेन ॥ तच्च तर्कसंग्रह पदेन भवति ॥ तथाहि ॥ तर्क्यंते प्रतिपाद्यंत इति तर्काः पदार्थाः। सम्यक् उद्देश लक्षणपरीक्षा विभागैः सह यहो ज्ञानं येनसः संग्रहः स्वरूप कथनं। तर्काणां संग्रहो यस्मिन्सः तर्क संग्रह इति व्युत्पत्त्या ग्रंथ घटक पदार्थ निरूपणं सूचितं। निरूपणंच लक्षण स्वरूप प्रामाण्यादि

प्रकारक ज्ञानजनकशब्दः। तत्र प्रयोजनं बोधायेति॥ लक्ष्यस्य लक्षणं युज्यते नवेति विचारः परीक्षा। उद्देशस्य लक्षज्ञानं प्रयोजनं। लक्षणस्य व्यावृत्ति ज्ञानं। परीक्षायाः लक्षणे दोषपरिहार ज्ञानं। विभागस्यावांतर भेदज्ञान मिति ध्येयं। ननुग्रंथकर्तुः पूर्वं बोधोस्ति नवा। आद्येग्रंथवैय्यर्थ्यं। द्वितीये कर्तृत्वमेव नसंभवतीति बोधस्य प्रयोजनत्वं कथंगछत इत्यत आह। बालानामिति। बालत्वंच गुरुक्तग्राहकत्वेसति धारणपटुत्वेसत्यादरवत्वेसति स्थिरचित्तत्वं। गुरूक्तग्राहकत्वाद्यन्यतमानुक्तौ सफलबोधस्यैव प्रयोजनत्वेन निष्फलस्य तादृशबालबोधस्य-प्रयोजनत्वानुपपत्तिः॥ फलंच पदार्थतत्व ज्ञानादपवर्गः॥ ननुबालबोधायप्राचीनग्रंथसत्वे कुत इदमित्यत आह। सुखेति। बोधरूपक्रियाविशेषणं। अर्थादित्वाद्च्। तयोः सामानाधिकरण्यं संबंधः। पूर्वार्धंतसन्निहितशिष्यशिक्षार्थं मंगलनिबंधनं। स्फूर्तिप्रदत्वादेव-

ध्यानं। ज्ञानोपदेशकत्वादि द्यागुरुवंदनं। प्रारब्धकार्यसमाप्तिहेतुत्वं मंगलत्वं। तत्त्रिविधं। मानसिकं कायकं वाचिकं चेति। मनसिभवं मानसिकं। उत्कृष्टत्व प्रकारक स्मृति विशेष रूप ध्या
॥२॥ नं। तस्य समाप्तेश्चात्मनिष्ठ प्रत्यासत्या कार्यकारण भावः। स्वप्रतियोगि चरमवर्णानुकूल कृ-
तिमत्व संबंधेनसमाप्तेः समवायेन मंगलं कारणं। समाप्तिस्तु चरमवर्ण ध्वंसः। काये भवं कार-
कं॥ अभीष्टप्रार्थना प्रयोज्य दंडवत्पतनादि रूपक्रिया। समवायः कारणतावच्छेदक संबंधः।
स्वप्रतियोगि चरमवर्णावच्छेदकता कार्यतावच्छेदकसंबंधः। अयंतु शरीर निष्ठ प्रत्यासत्याका
र्यकारण भावः। वाचि भवं वाचिकं। उत्कृष्टत्व प्रकारक ज्ञान जनक शब्दः। ध्वंसस्य स्वप्रतियो ॥२॥
गि समवायि कारण वृत्ति त्व नियमात्कार्यतावच्छेदक संबंधः स्वरूप संबंधः। कारणतावच्छेद
कसंबंधः समवायः। आकाशनिष्ठ प्रत्यासत्या कार्यकारण भावः। प्रत्यासत्तिराश्रयत्वं। अ

त्र निधाय हृदि विश्वेशमिति मानसिकं। विधाय गुरुवंदनमिति कायकं वाचिकंच। यदि अभिवादनस्तुत्योरित्यस्माद्धावेल्युटोभिधानात्। अनेन पद्येन इदं प्रकरणमनारंभणीयं विषयप्रयोजनाधिकारिसंबंधशून्यत्वात्काकदंतपरीक्षादिवदिति शंकापरास्ता। तथाहि। तर्कसंग्रहपदेन तर्का एवविषया इत्युक्ताः। बोधायेति प्रयोजनं। बालानामित्यधिकारी। पदार्थग्रंथयोः संबंधः प्रतिपाद्यप्रतिपादक भावः। प्रयोजनग्रंथयोर्जन्य जनक भावः। ग्रंथाधिकारिणोः पाठ्यपाठक भावः। तथाच पूर्वपक्षानुमाने स्वरूपासिद्धिः। इदं प्रकरणमारंभणीयं विषयप्रयोजनसंबंधाधिकारिमत्वात् संप्रतिपन्नवदिति सिद्धांतः। ननु मंगलस्य कर्तव्यत्वे प्रमाणाभावइति चेन्न। शिष्टाचारानुमित श्रुतेः प्रमाणत्वात्। तथाहि। मंगलंवेदबोधित कर्तव्यताकं अलौकिकाविगीताचारविषयत्वाद्दृशादिवत्। भोजनादौ व्यभिचारवार

णाया लौकिकेति । विध्य विषयत्वे सति रागतः प्राप्तत्वं लौकिकत्वं । तद्भिन्नत्व मलौकिकत्वं। रात्रि श्राद्धादौ व्यभिचार वारणाया विगीतेति । धर्मशास्त्रा विरुद्धेत्यर्थः । विघ्न ध्वंस कामो मंगल माचरेत् । समाप्ति कामो मंगल माचरे दित्यादि श्रुतिरनुमिता भवति । ननु अनुमितौ विधेय तया भास मानत्वं अनुमितत्वं वेदस्य तदभावः । यदि अनुमिति विषयत्व मेवानुमितत्व मुच्यते- तर्हि पर्वतो वन्हि मानित्यादौ वन्हित्वा देरप्यनुमितत्व व्यवहारापतिः । अतः शिष्टाचारा नुमित त्वं श्रुतेः कथमिति चेन्न । विधेय कोटि प्रविष्टानां सर्वेषां विधेयत्व मिति न्यायेन श्रुते र्वि धेय कोटयंतर्भावेण विधेय त्वाभ्युपगमात् । अनुमितेः पूर्वं तच्छ्रुतेरसिद्धत्वात् । किंच मंगलं कर्तव्यं समाप्ति फलकत्वात् । यद्यत्फलं तत्तत्कर्तव्यं यथा घटादीति अनुमान मपि प्रमाणं बोध्यं। ननु मंगलं न समाप्ति साधनं । कादंबर्यादौ मंगले कृतेपि समाप्त्य भावेनान्वय व्यभिचारात्।

कारणसमानाधिकरणाभावप्रतियोगित्वं कार्यस्याचयव्यभिचारः। मंगलाभावेपिनास्तिकग्रंथादौ समाप्तिसत्वात् व्यतिरेकव्यभिचाराच्च। कार्यसमानाधिकरणात्यंताभावप्रतियोगित्वं कारणस्यव्यतिरेकव्यभिचारःइतिचेन्न। विघ्नध्वंसनिर्वाहकमंगलस्यकारणत्वात्। मंगलेनविघ्नध्वंसः। तेनसमाप्तिरितिमंगलंकरणंविघ्नध्वंसोव्यापारःसमाप्तिःकार्यं। एवंचकादंबर्यादौतादृशमंगलाभावान्नास्तिकग्रंथादौ जन्मांतरीयादिमंगलकल्पनाच्चनव्यभिचारइति। इतिमंगलवादः। अथप्रतिज्ञातपदार्थान्विभजते। द्रव्येति। इतिशब्दोध्याहार्यः। अन्यथाप्रत्येकंद्रव्यादिषुसप्तत्वान्वयःस्यात्। ननुलक्षणज्ञानंविनाविभागप्रयोजकलक्ष्यज्ञानासंभवाल्लक्षणकथनमंतराविभागोनुपपन्नइतिचेन्न। पदार्थानुद्दिश्यसप्तत्वविधानात्विभागवाक्यघटकोद्देशवाचकपदार्थपदेनैवपदस्यार्थःपदार्थइतिव्युत्पन्नेनार्थपदस्याभिधेयवाचकत्वेनपदनिरूपितामिधा-

॥४॥

वि [illegible] भि धेयत्वस्यैव लक्षणत्वेन विवक्षितत्वात्। लक्षणंच लक्ष्य तावच्छेदक समनीत धर्मः ॥ समनीतत्वंच समव्याप्तत्वं। तच्चयद्व्यापकं लक्ष्य तावच्छेदकं तत्वेसति लक्ष्य तावच्छेदक व्यापक त्वरूपं। ननु लक्ष्य तावच्छेदक व्यापकत्वेसति लक्ष्य तावच्छेदक व्याप्यत्वं। व्याप्यत्वं स्वाभाव वदवृत्तित्वरूप तया पदार्थत्वरूप लक्ष्य तावच्छेदकाभावा प्रसिद्ध्याभि धेयत्वा दाव्याप्तेः। अति व्यापक वारणाय सत्यंतं। अव्यापक वारणाय विशेष्यं। व्यापक त्वंच स्वसमानाधिकरणात्यंता भावा प्रतियोगित्वं। यथागोःसास्नादिमत्वं। लक्ष्यत्वंचोद्दिष्टत्वं। लक्ष्य तावच्छेदकंच शक्ति ग्रहे प्रकारी भूत धर्मः। यत्धर्मावच्छिन्नं लक्ष्यं स धर्मोलक्ष्य तावच्छेदक इति नोपपद्यते। शीत-स्पर्शवत्वस्य जल लक्षणतायां स्नेहवत्वस्य लक्ष्य तावच्छेदकतापत्तेः। यस्य लक्षण मुच्यते तल्लक्ष्य मित्यपिन। लक्ष्य ज्ञानं विना लक्ष्य तावच्छेदक समनीतत्व रूपलक्षण ज्ञानंन भवाते लक्षण

॥४॥

ज्ञानं विना लक्ष्य ज्ञानं न भवतीत्यन्योन्याश्रयात्। लक्षणं त्रिविधं। व्यावर्तकं व्यावहारिकं तदुभयात्मकं चेति। इतर भेद बुद्धि जनकं व्यावर्तकं। यथा पृथिव्याः गंधवत्वं। पृथिवीतरेभ्योभिद्यते गंधवत्वा द्व्यतिरेकेण जलवदिति। तल्लक्षणंतु व्यतिरेकित्वे सति लक्ष्य तावच्छेदक समनीतत्वे सति लक्ष्य तावच्छेदक भिन्नत्वं। केवल व्यावहारिकेभिधेयत्वा दाघति व्याप्ति वारणाया चंदलं। असंभवि वारणाय द्वितीयं। व्यावर्तक व्यावहारिक द्रव्यत्वादि वारणाय विशेष्यं। व्यावहारिकं च व्यवहार प्रयोजकं। यथाभिधेयत्वादिकं पदार्थसामान्य लक्षणं केवलान्वयित्वे सति लक्ष्य तावच्छेदक समनीतत्वं लक्षणं। व्यावर्तक वारणाय सत्यंतं। अतिव्यापक वारणाय विशेष्यं। व्यावृत्ति बुत्धि जनकं व्यवहार प्रयोजकंच व्यावर्तक व्यावहारिकं। यथा द्रव्यादेर्द्रव्यत्वादि। व्यतिरेकित्वे सति लक्ष्य तावच्छेदक रूपं। व्यावहारिक मात्रे पदार्थत्वेति व्याप्ति वार-

णाय व्यतिरेकित्वे मनीति। ननु द्रव्यत्वा देर्व्यावर्त कत्वे लक्षण लक्ष्य तावच्छेदक योरैक्येन-
साध्य सिद्धेः प्रति बंधक तया कथमितर भेदानु मिति रिति चेन्न। इतर भेदानु मिति स्थले व्यतिरे
क व्याप्ते रावश्यक तान्वय व्याप्ति भावे नसाध्य सि ध्यभावात्। सिसा धयिषा विरह विशिष्ट सिद्धे
रेव प्रति बंधक त्वाच्च। त्रयोलक्षण दोषाः। अति व्याप्तिर व्याप्तिरसंभव इति। अलक्ष्यवृत्ति त्व
मति व्याप्तिः। लक्ष्यता वच्छेदका भाव वद्वृत्ति त्वमिति यावत्। यथागोः शृंगित्वं। नचासंभ विन्य
ति व्याप्ति शंका। उपधेय संकरेप्युपाधेरसंकर इदि त्युक्तेः। यद्वालक्ष्य वृत्तित्वे सतीति विवक्ष-
णीयं। तथाच लक्ष्य तावच्छेदक समानाधि करणात्यंता भावा प्रतियोगित्वे सति लक्ष्य तावच्छे
दका भाव वद्वृत्तित्वं। तेन नाव्यापके शृंगत्वादौ लक्ष्यैक देश वृत्ति न्यति प्रसंगः। इयं व्यावर्तक
लक्षणे व्यभिचार रूपा। यथा पृथिवी तर भिन्ना द्रव्यत्वादित्यत्र द्रव्यत्वस्य पृथिवी लक्षणत्वे

इतरभेदाभाव वतिजले द्रव्यत्वस्य सत्वा द्व्यभिचारः। नच व्यावर्तक लक्षणे न्वय व्याप्त भावेन क थं व्यभिचार इति वाच्यं। साध्याभाव समानाधिकरणात्यंताभाव प्रतियोगि हेत्व भाव प्रतियो गित्व रूपव्यतिरेक व्यभिचारात्। तथाच व्यतिरेक व्याप्ति विघटन द्वारा इतर भेदानुमिति प्रति बंधकत्व मति व्याप्तेः। लक्ष्यैक देशावृत्तित्व मव्याप्तिः। स्वसमानाधि करणात्यंताभाव प्रति यो गित्व स्वसामानाधिकरण्ये भय संबंधे नलक्ष्य तावच्छेदक वत्व मित्यर्थः। निर्दुष्ट वारणाय प्रथ म संबंधः। असंभवि वारणाय द्वितीयः। यथागोः शाबलत्वं। इयं भागासिद्धि रूपा। पक्षधर्म ता ज्ञान विघटने नानुमिति प्रति बंधिका। लक्ष्यमात्रावृत्तित्व मसंभवः। लक्ष्य तावच्छेदकाधिक रण निरूपितवृत्ति त्वावच्छिन्नाभाव इत्यर्थः। अव्याप्त वारणाया भावीय प्रतियोगितायां वृत्ति त्वत्वा वच्छिन्नत्व निवेशः। अयं स्वरूपासिद्धिरूपः पक्ष धर्मता ज्ञान प्रति बंधकः एतद्दूषण त्रय

रहितलक्षणज्ञाने सति लक्ष्यनिर्धारणं भवतीति लक्ष्यनिश्चये दोषज्ञानं प्रयोजकं। ननु विभागा
देवसप्तत्वेसिद्धे सप्तत्वग्रहणं व्यर्थमिति चेन्न। शक्तेरतिरिक्तपदार्थत्वमंगीकुर्वतः प्राभाकरस्य-
मतनिरासाय सप्तग्रहणात्। तथाहि। मण्यादिसन्नादशायां दाहापत्तिवारणायोत्तेजकदशायां
दाहानुत्पत्तिवारणायचवन्होदाहानुकूलशक्तिसिद्धिः। मंत्रादावपि शक्तेः सत्वाद्गुणवृत्तित्वेन
नद्रव्यादिवृत्तिकेतभावः। उत्पत्तिविनाशवत्त्वेन नसामान्यादिचतुष्टयेतभावः। अतः शक्तिरतिरि-
क्तःपदार्थइति। तन्न। दाहं प्रत्युत्तेजकाभावविशिष्टमणेः प्रतिबंधकत्वं तादृशमण्यभावस्य
कारणत्वमित्यंगीकारादेवसामंजस्ये शक्तेरतिरिक्तपदार्थत्वकल्पने गौरवात्। अत्र सप्तत्वं नसं ॥ ६ ॥
ख्यारूपं। गुणादौ तदभावात्। किंतु द्रव्यादिभेदसमुदायाधिकरणत्वरूपापेक्षाबुद्धिविशेष
विषयत्वं। क्वचित्सप्तेत्येवशब्दोदृश्यते। तच्चलौकिकप्रमादप्राप्तइति भाति। दीपिकाकारस्तु

भिरगृहीतत्वात्। उद्देशक्रमाद्द्रव्यादयो विभजते। तत्रेति घटकत्वं सप्तम्यर्थः। तस्यद्रव्येन्वयः उद्देशवाक्यघटकद्रव्यपदवाच्यानि नवसंख्याकानीत्यर्थः। लक्षणत्वेनाप्रयुक्तत्वे सति वस्तुप्रतिपादकसंस्कृतनामत्वं उद्देशस्य लक्षणं। गाथेत्यादिप्राकृतशब्दवारणाय संस्कृतेति। वंध्यापुत्र इत्यादिवारणाय वस्तुप्रतिपादकेति। गंधवती पृथिवीतिवारणायसत्यंतं। अत्र विभागवाक्यघटकद्रव्यपदेनैव जातिविशिष्टव्यक्तिबोधाद्द्रव्यत्वजातिमत्वं भावकार्यसमवायिकारणत्वंवा लक्षणमित्युक्तं भवति। द्रव्यत्वजातिसिद्धिस्तु प्रत्यक्षेण भावकार्यसमवायिकारणतावच्छेदकतयावा। द्रव्यपदशक्यतावच्छेदकतयावा। असतिबाधके तत्पदशक्यतावच्छेदकादीनां जातित्वमितिनियमात्। द्रव्यसमवायिकारणता किंचित्धर्मावच्छिन्ना कारणतात्वाद्दंडनिष्ठघटकारणतावत्। जातिबाधकनिरूपणंतु द्रव्यकिरणावल्यामुदयनाचार्यैः कृतं। व्यक्तेरभेदस्तुल्यत्वंसंकरोऽ

नवस्थितिः। रूपहानिरसंबंधो जातिबाधकसंग्रह इति। स्वाश्रयव्यक्तैरैक्यं व्यक्तेरभेदः। नित्यमेकमनेकवृत्तिसामान्यमिति जातित्वज्ञाने व्यक्तैक्यज्ञानस्य याह्या भावावगाहितयाप्रतिबंधकत्वं। स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तिलोभयसंबंधेन यत्किंचिद्भेदविशिष्टान्यधर्मत्वं एकव्यक्तिकत्वं। आकाशत्वस्य जातित्वे बाधकं। व्यक्तेस्तुल्यत्वंचान्यूनानतिरिक्तव्यक्तिकत्वं। स्वसमानाधिकरणाभावाप्रतियोगित्वस्वाभावसमानाधिकरणात्यंताभावप्रतियोगित्वोभयसंबंधेन यत्किंचिज्जातिविशिष्टत्वं। षट्त्वकलत्वयोरुभयोरपि जातित्वे बाधकं। परस्पराभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरः स्वसमानाधिकरण्यस्वाभावसामानाधिकरण्यस्वसमानाधिकरणात्यंताभावप्रतियोगित्वे तत्त्रितयसंबंधेन यत्किंचित्धर्मविशिष्टत्वं। पृथिवीत्वेन जलत्वस्य सांकर्यवारणाय प्रथमसंबंधनिवेशः। पृथिवीत्वेन घटत्वस्य सांकर्यवारणाय द्वितीयः। पृथिवीत्वेन द्रव्य-

त्व वारणाय तृतीयः। इदं सांकर्य उभयोरपि समान बलत्वे विनिगमना विरहादु भयोरपि जातित्वे बाधकं। यथा भूतत्व मूर्तत्वयोः। क्रिया समवायि कारण तावच्छेदक तया मूर्तत्वस्य जातित्वे सिध्येव हिरिंद्रिय ग्राह्य विशेष गुणसमवायि कारण तावच्छेदक तया भूतत्व स्यापि जातित्वं। क्वचिदन्यतर स्य प्रबल प्रमाणे नजातित्व निश्चये परस्य जातित्वे बाधकं यथागं धसमवायि कारण तावच्छेदक त या पृथिवी त्वस्य जातित्वे प्रत्यक्षतः सिध्ये शरीरत्वेंद्रियत्वादिकं नजातिः। सांकर्य ज्ञानस्य तद भाव व्याप्य वत्ताज्ञान मुद्दया जातित्व ग्रह प्रति बंधकत्वं। सांकर्यस्य जातित्वा भाव व्याप्यत्वे ब्रह्म-क्षत्रादि नामेकतर बीजेना परक्षेत्र जे शरीरे ब्रह्मत्वा द्यात्मक जाति द्वय निरासकानि ब्राह्मण्यांक्षत्रिया ज्जातो ब्रह्म बंधुरिति स्मृत इत्यादि श्रुति पुराणान्येव प्रमाणानि। अन्य था ब्रह्म बंधुत्व स्फुत्वादि वैफल्यं। अनवस्थिति रनवस्था। जातौ जात्यंगी कारे बाधिका। रूप हानिः स्वरूपा भावः। विशे

षाणां जातिमत्वे बाधिका। तथाहि। परमाणुषु व्यावर्तकतया विशेषाः सिध्यंति। स्वयं व्यावृत्तो धर्मः स्वाश्रय व्यावर्तको भवति अव्यावृत्त धर्मो न व्यावर्तक इति न्यायेन परस्परा व्यावृत्तानां व्यावर्तकत्वा संभवात्तत्र व्यावर्तकांतरापेक्षायामनवस्था पत्या परमाणूनां परस्पर व्यावर्तका विशेषाः स्वत एव परस्पर व्यावृत्ता इति स्वतो व्यावर्तकत्वं तेषां लक्षणं। व्यावर्तकांतरानपेक्ष सिद्धि विषय परस्पर भेदकत्वं रूपं तच्च विशेषणामेक जातीयत्वेसति नोपपद्यते। एक जातीयानां परस्परं भेदः प्रत्यक्षतोवगंतव्यः परस्पर व्यावृत्त धर्माद्वा। नचेह प्रत्यक्ष संभवः। परस्पर व्यावृत्त धर्मांगीकारेत्वनवस्थितिः। एवंच विशेषाणामव्यावृत्तत्वा द्व्यावर्तकतानस्यात्। तथाच विशेषाणां स्वरूपं व्यावर्तकांतरानपेक्षसिद्धि विषय परस्पर भेदकत्वंवा परमाणुषु परस्पर व्यावर्तकत्वंवा। तस्य हानिर्विशेषाणां जातिमत्वे बाधिका॥ ७॥ असंबंधस्तु प्रतियोगितानुयोगितान्यंतर संबंधे

नसमवायाभावः। गगनादौ जात्यभावप्रसंगवारणायानुयोगितेति। सामान्यविशेषयोर्जातिमत्वे बाधिकयोरनवस्थितिरूपहान्योर्वैयर्थ्यापत्तिवारणायप्रतियोगितेति। अयंचसमवायाभावयोर्जातिमत्वे बाधकः। जातिबाधकत्वंचास्यतदभावव्याप्यवत्ताज्ञानमुद्रया। यत्रयत्समवायानुयोगिकत्वंनास्तितत्तत्रनजातिः। तत्समवेतत्वाभावात्। तथाचसमवायानुयोगिकत्वाभावस्यजात्यभावव्याप्यत्वेसिद्धेसतरांतद्व्याप्यस्यसमवायप्रतियोगित्वानुयोगित्वान्यतराभावव्याप्यत्वमितिनन्वसंबंधेनैवचारितार्थेनवस्थारूपहान्योर्वैयर्थ्यमितिचेदुच्यते। व्यक्त्यभेदतुल्यत्वसंकराणांजातित्वबाधकत्वं। अनवस्थितिरूपहान्योर्जातिमत्वबाधकत्वं। असंबंधस्यजातित्वजातिमत्वोभयबाधकत्वं। समवायप्रतियोगित्वाभावस्यापिजातित्वाभावव्याप्यत्वेनसमवायानुयोगित्वसमवायप्रतियोगित्वान्यतराभावस्यजातिमत्वजातित्वान्यतराभाव-

व्याप्यत्वेनतदभाव व्याप्य वत्ता ज्ञान मुद्रयान्यतर प्रतिबंधकत्वय संबंधस्येति। ७। नवग्रहणं न्यूनाधिक व्यवच्छेदाय। एवकारस्तु तमसोदशा मद्रव्यत्व मंगी कर्तृणांमीमांसकानां मतनिरासाय। तथाहि। नीलं तमश्चल तीति प्रतीति विषयत्वेन गुण क्रिया श्रयत्वात्तमोद्रव्यं। रूपवत्वा न्नाकाशादि ष्वंतर्भावः। स्पर्शरहितत्वा न्न पृथिव्यादि चतुष्टयइति। तन्न। तमोनरूपिद्रव्यं-आलोकासह कृतचक्षुर्ग्राह्यत्वादालोका भाववत्। रूपिद्रव्यचाक्षुष प्रत्यक्षे ऐंद्रिय कालोक सहकृत चक्षुषः कारणत्वात्। अत्युत्कृष्टानुत्कृष्टा लोक वारणायैंद्रिय केति। घूकादि वारणाया स्मदीयत्वेन प्रत्यक्ष विशेषणीयं। अतो नभिभूत रूपाधिकरण महत्वादि करणनेजः सामान्या भाव एव तमइत्यनेनैवोपपत्तौ द्रव्यांतर कल्पने गौरवात्। कृष्णवर्णवति गर्भागारे तमोव्यवहाराभावापत्ति वारणाया नभिभूतेतिरूपविशेषणं। चक्षुरिंद्रियसत्वे तदापत्ति वारणाय महत्वाधिकरणेति।

॥ ६॥

॥ ६॥

चंद्रादि सत्वे सूर्यादितेजोभाव मादाय तमो व्यवहारापत्ति वारणाय सामान्येति। तमसि रूप व्यापक-स्पर्शाभावेन तमोनीलमिति प्रतीतिः अभाव विशेष्यक प्रतीतित्वात् भ्रमः। आलोक निष्ठगमना गमन-रूपक्रिया वास्तद् भावरूप तमोनिष्ठत्वेन तम श्चलतीति प्रतीतिरपि भ्रम एवेति। ७। अथ क्रम प्राप्ता-न्गुणान्विभजते। रूपेत्यादि। पूर्ववद्द्रव्य क्षणंकर्म भिन्नत्वे सत्यसमवायि कारणत्वंवा। द्रव्य कर्मभिन्न सत्तावन्निष्ठ कारण तावच्छेदक तया गुणपद शक्यतावच्छेदक तया वागुणत्व जातिसिद्धिः। वामन म तानुसारिणः लघुत्वादीनपि गुणानाहुः। लघुत्वस्य गुरुत्वाभावरूपत्वान्न पृथग्गुण इत्यादि तन्निरा-सायचतुर्विंशति ग्रहणं। कर्माणि विभजते उत्क्षेपणेति। कर्मत्व जाति मत्वं लक्षणं। संयोग भिन्नत्वे सति संयोगा समवायि कारणत्वंच। चलना कारानुगत प्रत्ययात्कर्मत्व जातिसिद्धिः। भ्रमणादीनाम पि गमन विशेष रूपतया कर्मानेकत्व मंगी कर्तृणां वामनीयानां मत निरासाय मंचेति। उत्क्षेपणादी

नामपि गमनेन भीषाद्रमेकमेवेति स्वतंत्रः। सामान्यं विभजते परमिति। द्वे विधे प्रकारौ यस्य तद्विविधं। परत्वापरत्वरूपप्रकारद्वयवदित्यर्थः। परत्वंचाधिकदेशवृत्तित्वरूपव्यापकत्वं। अपरत्वंचाल्पदेशवृत्तित्वरूपव्याप्यत्वं। परत्वापरत्वयोः सावधिकत्वेन परत्वं अपरत्वं तदुभयंच यथायोगंबोध्यं। केवलं परासत्ताद्रव्यगुणकर्मवृत्तिः। केवलं अपरा घटत्वादि। द्रव्यत्वादिकंतु सत्तापेक्षया व्याप्यापृथिवीत्वाद्यपेक्षयाव्यापिकाच। अत्रसामान्यपदेन जातिरेव विवक्षिता। यद्वस्थितिनित्यमेकमनेकानुगतं सामान्यमिति। ननु तर्हि प्रमेयत्वादीनामतिरिक्तपदार्थत्वंस्यादितिचेन्न। तत्तदर्थरूपत्वात्। अतएवस्वरूपसंबंधेन तस्यस्थितिः। वस्तुतस्तु नामार्थेप्रकारीभूतधर्मः सामान्यं। तद्विविधं। जातिरूपाधिश्चेति। जातिर्निरूपिता। उपाधिर्द्विविधः। सकलोपाधिरकलोपाधिरिति। एकव्यक्तिवृत्तित्वादननुगतः सकलोपाधिः। यथागगनत्वादिः। अनेकव्यक्तिवृत्तित्वादस्वं

ड्डोषाधिरनुगत धर्मः। सद्विवि धः। ःरश्चापरश्च। परः प्रमेयत्वादिः। अपरोभावत्वादिः। सखंडो षाधिस्व पर एवेति।व्यापकत्वंच स्वस गानाधि करणात्यंताभावा प्रति योगित्वे सति स्वाभावसामा-नाधि करण्यां स्वपदं व्यापकतानिरूपकपरं। व्याप्यत्वंच स्वसमानाधि करणाभाव प्रति योगि त्वे सति स्वसामानाधि करण्यं। स्वपदं व्याप्यता निरूपकं परं। विशेषाश्चिरूपयति। नित्यद्रव्येति। नि त्यद्रव्याणामनंतत्वेन तद्वृत्ति विशेषाणा मप्य नंतत्वं। तेषांपरस्पर भेदकत्वात्। परमाणूनां पर स्पर भेद निर्वाहाय विशेष स्यातिरिक्त पदार्थत्वेनांगी करणीय तयातत्परमाणुत्वादी नामेव भेदक त्वा द्विशेषोनपदार्थांतरमिति तर्क भाजनहम तनिरासार्थे वकारः। अव्यावृत्त धर्मस्य व्यावर्तकत्वा भावा त्तत्रापि व्यावर्तकांतरापेक्षाया मनवस्था। विशेषस्तु स्वतएव व्यावृत्त इत्युक्तं। समवायं निरू पयति। समवायस्त्विति। समवायस्यैक त्वे वायोरूप वतीत्यापत्यानेक त्वं वदतां प्रतिभासि-

कानांमत निरासायैवेति । प्रत्यक्षं प्रति विषयस्य कारण तया तत्र रूपाभावात् । समवायस्याति रिक्त पदार्थत्वस्थिरीकरणायनुः । अभावं विभजते । अभाव इति । नभावोऽभाव इति व्युत्पत्ते र्नेति प्रतीति विषयत्वं भावभिन्नत्वंवा लक्षणं । अथोद्देश क्रमेण प्रथमं पृथिव्या लक्षणमाह । तत्रेति । नव द्रव्ये ष्वित्यर्थः । यागंधवती सैव पृथिवी शब्द वाच्येत्यर्थः । गंधवत्वं पृथिव्या लक्षणं । त्वतलोर्गुणव चन स्येति पुंवद्भावः । गंधवत्वंच गंधसमानाधि करण द्रव्यत्व व्याप्य जातिमत्वं विवक्षि तं । तेनाद्य क्षणावच्छिन्ने घटे उत्पन्नं द्रव्यं क्षणम गुणंतिष्ठति पश्चात्तत्समवेता गुणाः कि यान्नोत्पद्यंत इतिन्यायस्य द्रव्यस्य समवायि कारण त्वोपपत्यर्थ मावश्यक तया गंधा- भावेपिना व्याप्तिः । जलत्वादि मादाय जलादि वारणाय गंधसमानाधि करणेति । द्रव्य त्वमादाय जलादिवारणाय द्रव्यस्येति व्याप्येतिच । उभयत्वादिक मादाय जलादि वार-

णाय धर्मेत्यनुक्ता जातीति। गंधाधिकरण विवक्षया साक्षाज्याप्यत्व विवक्षया वा घटत्वादिक मादाय नाव्याप्तिः। जातिमत्त्वंच समवाये नवि वक्षणीयं। तेन कालिक संबंधे तस्वाश्रय संयुक्त त्वादि नाचन जलादावति व्याप्तिः। तां विभजते। सेति। नित्यत्वं च भविष्यतिनश्यतीति प्रतीत्य विषयत्वं। प्राग भावा प्रति योगित्वे सति ध्वंसा प्रति योगित्वमिति यावत्॥ ननु प्राग भावपदे नस्व प्रागभावो वान्य प्रागभावो वाया वत्प्रागभावो वा विवक्षितः। एवं ध्वंसपदेनापि। नाद्यः। प्रागभावा प्रसिद्धेः। नद्वितीयः। घटादेरपि नित्यत्वा पत्तेः। नांत्यः प्रसियोग्य प्रसिद्धेरिति चेन्न। प्रागभाव प्रतियोगिभिन्नत्वे सति ध्वंस प्रतियोगि भिन्नत्वस्य विवक्षणात्। परमाणुरूपं आकारो यस्याः सापरमाणुरूपा। अनित्यत्वंच प्रागभाव प्रतियोगित्वं वा ध्वंस प्रतियोगित्वंवा न

दुभय प्रति योगित्वंवा। कार्यरूपेति। कार्यात्मिकेत्यर्थः। अनित्यांविभजते। पुनरिति। पञ्चा दुक्तानित्य पृथिवीत्यर्थः। पुनरप्रथमे भेद इत्यमरः। वस्तुतस्तु पुनरित्यस्य प्रकारांतरेणेत्यर्थः। तेननित्यपृथिव्य नित्य पृथिव्यपि शरीरेंद्रिय विषय भेदेनत्रिविधेति संपन्नं। विषय भूतानां परमाणूनां नित्यत्वं सिद्धमेव। शरीरेंद्रिय योरप्यु पादानंभूतावयवानां नित्यत्व मवश्य मंगीकार्यं। अन्यथा वयवा भावे कर्येत्पत्य सिध्यातस्याप्यवयवांतर स्वीकारेनवस्था। विषय भूतानां परमाणूनामेव शरीरेंद्रि यावयवत्वांगीकारे निजातीया वयवाद्वि जातीया वय व्युत्पत्ति प्रसंगः। यदि शरीरेंद्रियारंभक शक्तिमत्परमाणूनामेव तदवयवत्वं कल्प्यते किं प्रत्येक मिंद्रिया[illegible] कल्पनेनेति चेत्तर्हि तेषमिवनित्येंद्रि यत्वं नित्यशरीरत्वंच। उपभोगे करण मिंद्रियं। भुज्यते ऽनेन शरीरं। [illegible] घटा

॥१२॥

दिरितभेदः। कार्यशरीरे कार्यरूपेंद्रियं कार्यरूपविषयः। नित्यशरीरे नित्येंद्रियं नित्यविषयः। नित्यं सर्वं परमाणुरूपं। ननु पृथिवी त्रिविधा शरीरेंद्रिय विषयभेदाज्जलवदित्युक्ते पृथिव्याः शरीराद्यात्मकत्वे नतद्भेदाभावात्कथमस्य हेतोस्त्रैविध्य साधकत्वमित्याह। भिद्यतेनेनेति भेदइति करण व्युत्पत्त्या भेद पदस्य शरीरादि निष्ठवैलक्षण्य ज्ञापक धर्मपरत्वात्। सच धर्मः शरीरत्वादि रूपः परस्परासमानाधिकरणः। तथाच शरीरत्वादि रूपासमानाधिकरण धर्मवत्वादिति हेतोः पृथिवी मुद्दिश्य त्रैविध्यं विधीयते। परस्परत्वंच स्वसामानाधिकरण्य स्वसमानाधिकरणात्यंताभाव प्रतियोगित्वोभयसंबंधेन विधेय विशिष्टोद्देश्य तावच्छेदकत्वं। यथा शक्तिरेंद्रिय विषयाणां परस्परं वैलक्षण्यं। तथाचैत्रमैत्रयोः परस्परं मैत्री। अत्र विधेयं वैलक्षण्यं मैत्रीच।

त.सं. ॥१३॥

उद्देश्य तावच्छेदकं शरीरत्वमेवत्वादि। अवच्छेदकता संबंधेन सुखदुःख साक्षात्कार व्या-
त्यं शरीरत्वं। नच वृक्षादिष्वव्याप्तिः। शीतवातातपक्लिष्टा जीवंते वृक्षरूपेण इति स्मृते-
स्तेषामपि सुखदुःख साक्षात्कारात्। पादादीनामवयवयोगावच्छेदकत्वेन तद्वारणायां त्यावय
वित्वे सतीति विशेषणीयं। अस्मदादी नामित्यादि पदेनांडज स्वेदजो द्भिज्जानां ग्रहणं।
तथाचेत्थं विभागः। शरीरं द्विविधं। योनिजमयोनिजंचेति। योनिजं द्विविधं। जरायुज
मंडजं चेति। जरायुजं मनुष्यादीनां। अंडजं पक्ष्यादीनां। अयोनिजं द्वेधा। स्वेदजमु
द्भिज्जमिति। स्वेदजाः मत्कुणादयः। उद्भिज्जा वृक्षादयः। इति। भग्नक्षतरोहेणांतः
प्राण संबंध सिध्यातेन वृक्षादीनां शरीरत्व सिद्धिः। अवच्छेदकता संबंधेनभोगवद्वृत्य-
नित्य द्रव्यविभाजकोपाधि मत्वस्य तेनसंबंधेन भोगवद्वृत्ति द्रव्यत्व व्याप्य जातिमत्वस्य

व्या-
॥१३॥

वावि वक्षणा छरीरत्व मादाय चैत्रत्वादिक मादाय वासमन्वयान्न मृतशरीरे व्याप्तिः। इं द्रियं निरूपयति। इंद्रिय मिति। इंद्रियत्वंच शब्देतरो द्भूत विशेषगुणानाश्रयत्वे सति ज्ञान कारण मनः संयोगाश्रयत्वं। आत्मन्यति व्याप्ति वारणाय सत्यंतं। श्रोत्रे व्याप्ति वा रणाय शब्देतरेति। चक्षुरादावनुद्भूत रूपादि विशेषगुण सत्वेना व्याप्ति वारणायो द्भूतेति। संयोग मादाया संभव वारणाय विशेषेति। कालादावति व्याप्ति वारणाय ज्ञा नकारणेति। आत्ममनः संयोगस्यैव ज्ञान कारणत्वेन कालघट पटादि मनः संयोगस्य त दभावात्। रूपादिवारणाय संयोगाश्रयत्व मिति। प्राचीनमते इंद्रियावयवार्थाच यव संयोगस्यापि प्रत्यक्ष कारणत्वांगीकारेणेंद्रि यावयव वारणाय मनःपदं। नवीनमतेतु कालादौ रूपाभाव प्रत्यक्षस्य सन्निकर्ष घटकतया कारणी भूत चक्षुः संयोगाश्रयेका

लेति व्याप्तिवारणाय मनःपदं। नन्वात्मभिन्नत्वे सतीत्यनेनैवात्मवारणे कुतो गुरुतर सत्यंतमिति चेन्न। चर्ममनःसंयोगस्य ज्ञानकारणत्वेन चर्मण्यतिव्याप्तेः। गंधयाह कमितिगंधज्ञानकरणत्वं। गंधवदिंद्रियत्वंवा घ्राणस्य लक्षणं विषयं दर्शयतिविषयइति। गंधवत्वेस। उपभोगसाधनत्वं विषयत्वं। द्व्यणुकमारभ्य ब्रह्मांडांतं साक्षात्परंपरयावोपभोगसाधनमिति प्रांचः। परमाणवोपितथेतिनव्याः। शरीरेंद्रियभिन्नत्वे सतीति वक्तव्यं। तेनोपभोगसाधनत्वेपि नतयोरतिव्याप्तिः। जलं लक्षयति। शीतेति। शीतस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वं विवक्षणीयं। रूत्यंपदानां पूर्ववत्। शीतस्पर्शवच्छरीरं जलशरीरं। रसज्ञानकरणत्वं शीतस्पर्शवदिंद्रियत्वंवा रसनस्यलक्षणं। शीतस्पर्शवान्विषयो जलविषयः तेजसो लक्षणमाह। उष्णस्पर्शवादे

ति। ऊष्णस्पर्शसमानाधिकरणजद्रव्यत्वव्याप्यजातिमत्वं बोध्यं। रूपज्ञानकरणत्वंवा ऊष्णस्पर्शवदिंद्रियत्वं वाचक्षुष्ट्वं। विषयं तेजसो विभजते। विषयश्चगुर्वादय इति। भुमौ भवं भौमं। दिवि भवं दिव्यं। उदरे भवं औदर्यं। आकरः खनिस्तत्र जातं आकरजं। ननुकृष्णवर्णस्य पीतरूपाश्रयत्वाद्गुरुत्वाश्च पार्थिवत्वं सिध्यति। कथंतैजसत्वमिति चेदुच्यते। पीतिमगुरुत्वाश्रयः पार्थिवभागः। तदा ह्यग्नेरत्यंतानल संयोगेप्यनुच्छिद्यमान द्रवत्वाधिकरणं द्रव्यांतरं तत्रवर्तते। तदेवकृष्णवर्णं। तथाच अत्यंतानलसंयोगीपीतिमगुरुत्वाश्रयः द्रवत्व नाशप्रतिबंध द्रवद्रव्यांतर संयुक्तः। अत्यंतानल संयोगेप्यनुच्छिद्यमान द्रवत्वाधिकरणत्वाज्जलमध्यस्थ घृतवदित्यनुमाने नविजातीय द्रवद्रव्यसिद्धिः। अग्न्यसंयुक्त घृतादौ व्यभिचार वारणाय अत्यंतानल सं-

त.सं. ॥१५॥

योगेपीति। तच्चस्फवर्णसंज्ञकं विजातीयद्रवद्रव्यं नपार्थिवं असति प्रतिबंधके अत्यंतानलसंयोगेप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वातु व्यतिरेकेण घृतवदिति पार्थिवत्वाभावसिद्धिः। जलमध्यस्थघृते व्यभिचारवारणायासति प्रतिबंधके इति। नात्रहेतुरस्तु साध्यं मास्तित्यप्रयोजकशंका। यदिस्फवर्णं पार्थिवंस्यात्तर्हि असति प्रतिबंधके त्यंताग्नि संयोगे उच्छिद्यमानद्रवत्वाधिकरणत्वंस्यात्। अप्रतिबंधके पार्थिवद्रवत्व नाशात्यंताग्नि संयोगयोः कार्यकारणभावादित्यनुकूलतर्कसत्वात्। नैमित्तिकद्रवत्वाधिकरणत्वाज्जलादिष्वनंतर्भावेण द्रव्यांतरकल्पनेगौरवाच्च परिशेषात्तत्स्फवर्णमिति। तस्यपार्थिवभागोपष्टंभितत्वाभोष्णस्पर्शादि प्रत्यक्षं। धायोर्लक्षणमाचष्टे। रूपरहित इति। आकाशादिवारणायस्पर्शवानिति। पृथिव्यादिवारणा

व्या. ॥१५॥

यरूपरहितत्वति। अत्रापि रूपरहितत्व समानाधिकरणा स्पर्शसमानाधिकरणाच द्रव्यत्व व्याप्याच्च आजाति स्तद्वत्वं रूक्षणं। कृत्यंपदानां पूर्ववत्। ननु वायुसत्वे किंप्रमाणमिति चेन्न। तस्य स्पर्शानुमेयत्वात्। तथाहि। कस्यचिद्द्रव्यस्य संयोगे सति यः अनुष्णाशीतस्पर्शो भासते सस्पर्शः कंचिदाश्रितः गुणत्वाद्रूपवत्। तादृशप्रतीयमान स्पर्शाश्रयः पृथिवी न भवति। उद्भूतरूपाभावात्। नाप्रा प्रयोजकशंका। यत्र यत्रोद्भूत स्पर्शवत्वेसति पार्थिवत्वं तत्र तत्रोद्भूतरूपवत्व मितिनियमात्। अनुष्णाशीतस्पर्शवत्वान्न जलादिकं तादृशस्पर्शाश्रयः। एवंच तादृश स्पर्शाश्रयोयः स एववायुरिति ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वाद्घटवदित्यनुमानेन वायोः प्रत्यक्षत्वसिध्याकुतः स्पर्शानुमेयत्वमितिचेन्न। उद्भूतरूपवत्वस्यो पाधित्वात्। अत्र प्र

लक्षणेन बहिरिंद्रियजन्यप्रत्यक्षविषयत्वमर्थो विवक्षितः॥ अयमुपाधिर्द्रव्यत्वरूपप्रकृतधर्मावच्छिन्नसाध्यव्यापकः। ऊर्ध्वसाध्यव्यापकत्वे रूपेव्यभिचारात्। तथाच यत्र द्रव्यत्वे सति बहिरिंद्रियजन्यप्रत्यक्षविषयत्वं तत्रोद्भूतरूपवत्त्वमिति साध्यव्यापकता। यत्र यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र तत्रोद्भूतरूपवत्त्वमिति प्रकृतेप्यधोसाध्यव्यापकत्वं व्यभिचारात्। यत्र यत्धर्मावच्छिन्नसाध्यव्यापकउपाधिस्तत्र तत्धर्मवत्त्वेनोपाधिव्यभिचारेण साध्यव्यभिचारानुमानं। यथाप्रत्यक्षस्पर्शाश्रयत्वं बहिरिंद्रियप्रत्यक्षविषयत्वव्यभिचारिद्रव्यत्वावच्छिन्नेतद्व्यापकोद्भूतरूपव्यभिचारित्वादाकाशत्ववदिति व्यभिचारोद्भावकः। नतु सत्प्रतिपक्षोद्भावकः। वायुर्न बहिरिंद्रियप्रत्यक्षविषयः उद्भूतरूपाभावादित्यत्रैरू

पेक्ष्यभिचारात्। तस्मात्स्पर्शानुमेयो वायुरिति॥ ७॥ आकाशं लक्षयति॥ शब्दगुणकमिति॥ शब्दस्य द्रव्यत्वं वादिनिराकाङ्क्षायां शब्दाभिधेयार्थं च गुणपदं कप्रत्ययश्च॥ शेषादिभाष्ये सिद्धम्। तथाहि। शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियप्रत्यक्षविषयजातिमत्त्वाद्रूपादिवत्। नच वायुत्वसामान्यायोऽयमभिचारः। वायौरेवास्पर्शानुमेयत्वाद्प्रत्यक्षत्वेन वायुत्वस्याप्यप्रत्यक्षत्वात्। केचित्तु शब्दो गुणः अनित्यत्वे सत्येकेन्द्रियग्राह्यजातीयत्वाद्रूपवत्। अणुत्वादिकारणाच्च जातीयेति। एतेन शब्दस्य गुणत्वेसिद्धे शब्दो द्रव्यसमवेतः गुणत्वाद्रूपवदिति तस्यद्रव्याश्रितत्वं सिद्धं॥ शब्दः नपृथिव्यादिचतुष्टयसमवेतः। अग्निसंयोगात्तत्रापि क्रियाकारणकत्वाभावे सत्यकारणगुणपूर्वकप्रत्यक्षविषयत्वाद्रूपादिवत्॥ नापि दिगादिसमवेतः॥ बहिरिन्द्रियप्रत्यक्षोयोग्यविशेषगुणत्वादिति। अतःपरिशे

शेषाद्गमनसिद्धिः। प्रसक्तस्य प्रतिषेधेऽन्यत्र संप्रत्ययः परिशेषः। अथवाशब्दोऽद्रव्यातिरिक्तद्रव्याश्रितः अद्रव्यान्याश्रितत्वे सति समवायि कारणकत्वाद्व्यतिरेकेण रूपवत्। नन्वविशेष्यासिद्धिः। शब्दः समवायि कारणकः जन्यगुणत्वात् पृथिवीरूपवदिति तत्सिद्धेः। नापि विशेषणासिद्धिः। शब्दोऽद्रव्यानाश्रितः श्रोत्रग्राह्यत्वाच्छब्दत्ववदिति तत्सिद्धेः। विभ्विति॥ सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं। मूर्तत्वं च क्रियावत्वं। पृथिव्यप्तेजोवायुमनांसि मूर्तानि। आकाशकालदिगात्मानः विभवः। बहिरिंद्रियग्राह्यविशेषगुणवत्त्वं मूर्तत्वं। कालं लक्षयति। अतीतेति॥ अयमतीत इत्यादि व्यवहारेऽसाधारणकारणमित्यर्थः। व्यवहारः शब्दप्रयोगः। द्रव्यत्वेसतीति पूरणीयं। तेन न बुद्ध्यादिप्रसक्तिः। अतीतत्वं च वर्तमानध्वंसप्रतियोगित्वं। अनागतत्वं च वर्तमानप्रागभावप्रति

योगित्वं। वर्तमानत्वंच प्रयोगाधिकरण कालतदन्यत्वं। अतीतः क्षणः अतीतो घट इत्यादि व्यवहारेषु काल एव कारणं। अतीतागत व्यवहारयोः परस्परं तादृशक्षणयोरहेतुत्वा दित्याभिरत आहिपदं॥ क्षणत्ववादि व्यवहारः पूर्वक्षण ध्वंसादि व्यवहारोपि एकस्यैव कालस्योपाधि भेदादुपपद्यते॥ सर्वाधारः कालः सर्व कार्य निमित्त कारणंच॥ दिशोलक्षण माह॥ प्राच्यादीनि॥ उदयाचल सन्निहितादिक् प्राची। अस्ताचल सन्निहितादिक् प्रतीची॥ मेरुव्यवहिता दक्षिणा॥ मेरोः सन्निहिता उत्तरा॥ एकत्वेपु पाधिभेदात्त्रैव्यवहारः॥ दिगपि सर्वाधारः सर्वकार्य निमित्त कारणं। परत्वापरत्वयोर्हि कृतत्वेन कालकृतत्वेन परत्वापरत्व प्रयोजकत्वात्काल दिशोः सिद्धिः॥ यद्वा अहुतर दिवाकर क्रिया विशिष्ट शरीर संयोग कालिक परत्वोत्पत्ते र्दर्शनात्ता

दृश ज्ञानं विशेषण विशेष्यो भय संबंध घटक सापेक्षं साक्षात्संबं धा भावेसति वि शिष्ट ज्ञानत्वा
छोहित: स्फटिक इति ज्ञानवदित्यनु माने नतादृश संबंध घटक वि धया कालसित्धिः॥ सचसंबंधः
स्वसमवायि संयुक्त संयोगः। अहुतर मूर्त संयोग विशिष्ट वस्तु ज्ञानादैशिक परत्वोत्पत्ते र्दर्शना
त्तज्ज्ञानं विशेषण विशेष्यो भयसंबंध घटक सापेक्षं साक्षात्संबं धा भावेसति वि शिष्ट बुद्धि-
त्वा छोहित:स्फटिक इति ज्ञानवदिति तत्संबंध घटक तया दिक्सिद्धिः। वैशिष्ट्य घटक संबं
धस्तु स्वसमवायि संयुक्त संयोगः। आत्मस्वरूपण माह चष्टे। ज्ञानाधिकरणेति। समवायेन
ज्ञानाधिकरण योग्य तावत्व मित्यर्थः। तेन मुक्तात्मनि ज्ञाना भावेपि नक्षतिः। एक विंशति दुःख
ध्वंसो मोक्षः। तानि दुःखानितु शरीरं षडिंद्रि याणि षड्विषयाः। षड्बुद्धय: सुखंदुःखं चे-
ति सिद्धांतः। दुःख ध्वंसे आत्यंति कत्वं नीवेशनीयं। तच्च स्वसमानाधिकरण दुःखा सत्या

नकालिकत्वं। तेन संसार दशायां दुःख ध्वंस सत्वेपि नक्षतिः। सर्वज्ञ इति। जीवीय ज्ञान विषयास्तद विषयाश्चये पदार्थास्तत्त द्विषयक ज्ञान वानित्यर्थः। तेन इदं सर्व मिति सर्वत्व प्रकारक-ज्ञानव न्जीव निरासः। नतावदीश्वर सद्भावे प्रत्यक्षं बाह्य मांतरंवा प्रमाणं। अरूपि द्रव्यत्वात्स्फ-रवाद्द्रव्यांतरिक्तत्वाच्च। किंतु अंकुरादिकं सकर्तृकं कार्यत्वाद्घट वदित्यनुमानं। उपादान गोचरा परोक्ष ज्ञान चिकीर्षा कृति मत्वं कर्तृत्वं। अस्मदादीना मंकुरादि कर्तृत्वा संभवेनेश्वर सिद्धिः जीवलक्षण माह। जीवस्विति। शरीरे शरीरे प्रति शरीरं। वीप्सायामव्ययी भावः। प्रत्यर्थो वीप्सा। साच व्याप्तं। साकल्यवत्स जातीय व्याप्तं वीप्सयोच्यत इत्यनु शासनात्। अनेक शरीर व्याप्ति मानित्यर्थः। अतएवभिन्नः परस्पर भेदविशिष्टः। अनेन जीवानंत्य मुक्तं। अथवा प्रति शरीर मिति प्रत्येकं पदं॥ लक्षणेत्थं भूताख्यान भागवीप्सा सूप्रतिपर्यनव इति

क्षणार्थकप्रतेः कर्मप्रवचनीयत्वात्तद्योगे शरीरमिति द्वितीया। लक्षणं नाम ज्ञानज्ञाप्यत्वं। शरीरपदं शरीरभेदपरं। द्वितीयार्थः विषयत्वं। भिन्नत्वंच भेदप्रतियोगित्वं। तथाच शरीरभेदज्ञान ज्ञाप्यभेदप्रतियोगिनो जीवा इत्यर्थः। जीव इति जात्येक वचनं। एवंच जीवात्मानोनंताः प्रतिशरीरंभिन्नत्वात्। इंद्रियादिवत्। नात्र स्वरूपासिद्धिः। एतच्छरीरावच्छिन्नभोगवानात्मातच्छरीरावच्छिन्नभोगवद्भिन्नः तच्छरीरावच्छिन्नभोगानुसंधानाभावात्तैत्र शरीरात्मवदिति। शरीरत्वंच प्राणसंयुक्तत्वेनैक कालिकत्वेन योगजधर्मजन्यत्वेनच विशेषणीयं। तेन मृतशरीरमादायावयवोपचयादिनैक स्यैव शरीरस्य लक्षणे क्षणे भिन्नत्वेपि योगजधर्मजन्यशरीरमादाय नक्षतिः। इदं स्वरूपलक्षणं। अहं सुखीदुःखीत्याद्यबाधितप्रत्ययेन जीवसिद्धेःसुखादिमत्वं लक्षणं। नच मनुष्योहं ब्राह्मणोहमित्यादौ शरी

रस्याहं प्रत्यय विषयत्वा च्छरीर एवात्मेति वाच्यं। समवायि कारण नाशास्य द्रव्य नाशक-त्वा त्कर पादादि नाशे शरीर नाशादात्मनोपि नाशप्रसंगात्। नचानित्य आत्मा॥ पूर्व जन्म सं स्कारा भावापत्तेः। जीवोविभुः नपरमाणुः। सर्व शरीरा [illegible]ेन भोगा नुपपत्तेः। नमध्यम परि-माणः। यन्मध्यम परिमाणं तदनित्यमिति व्याप्त्या जीवस्यानित्यत्व प्रसंगात्। तथा सति कृत हान्याद्यापत्तिः। नच परमाणु रूपत्वेपि दीपवत्प्रकाशरूपेण व्याप्त्या सर्व शरीरावच्छे देन भो गोपपत्ति रिति वाच्यं। योगज धर्म जन्य काय व्यूहे स्करवा द्युपल ब्ध्यनुपपत्तेः। मनसोलक्ष ण माह। स्करवादीति। इदं स्वरूपनिरूपणं। स्पर्श रहितत्वेसति क्रियावत्वं लक्षणं। मनो लक्षणे इंद्रिय घटितत्वे नेंद्रिय लक्षणे मनो घटितत्वेन तज्ज्ञानं विना तज्ज्ञानं नजायत इत्य न्योन्याश्रयात्। सुखादि साक्षात्कारः करणसाध्यः जन्यसाक्षात्कारत्वाद्वा क्षुधादिवत्। चक्षुरा

दीनां बाधात्तत्करणत्वे नमनः सिद्धिः। प्रत्यात्म नियतत्वादिति। अनेकात्मस्वनियमे न संयुक्तत्वादित्यर्थः। नन्वाकाशादेरप्येकस्यैवानेकसंयुक्तत्वमस्तीत्यत आह। परमाणुरूपमिति। अन्यथासुषुप्त्यभावप्रसंगः। यदात्मानंत्यक्त्वा मनः पुरीततिं प्रविशति तदा सुषुप्तिः। यदात्मसंयोगस्तदा ज्ञानमिति स्थितिः। रूपं लक्षयति। चक्षुर्मात्रेति। मात्रपदमितरव्यवच्छेदार्थं। इतरच्चत्वगिंद्रियं। चक्षुरेव चक्षुर्मात्रं। मयूरव्यंसकादित्वात्समासः। ग्राह्यत्वंच प्रत्यक्षविषयत्वं। त्वगिंद्रियाप्रत्यक्षविषयत्वेऽपि चक्षुः प्रत्यक्षविषयत्वसत्ति गुणत्वं रूपस्यलक्षणं। संख्यावारणायप्रथमदलं। अदृष्टवारणाय द्वितीयं। येनेंद्रियेण या व्यक्तिर्गृह्यते तेनेंद्रियेण तद्गता जातिस्तद्भावश्च गृह्यत इति नियमाद्रूपत्वादिवारणाय गुणपदं। रसादिवारणाय चक्षुःपदं। मनसोपिचक्षुरादिद्वारा रूपादियाहकत्वमस्तीति पक्षेऽसंभव

॥२०॥

वारणाय चक्षुरितरेत्यनुत्कत्वगिंद्रि[illegible]र्ग्रहाः। तथापि परमाणुरूपस्यातींद्रियत्वान्नव्याप्ति वारणायत्वगिंद्रिया[illegible]ग्राह्य गुण विभाजकोपाधि मत्वमिति विशेषणीयं। तेन प्रभाघट संयोगेपिनातिव्याप्तिः। गुणपदं भूतमात्रात्मक त्वाद्रूपादीनां पृथिव्यादिष्वेतभाव इति वाद निरासायचेति बोध्यं। एवमग्नेरुष्णत्व भास्वरत्वे ति। विशेषणं[illegible]ण बहुलमिति बहुलग्रहणाद्विशेषणयोरुत्तरनिपातः। रसनग्राह्येति। रसनेंद्रिय प्रत्यक्ष वि[illegible]गुण विभाजकोपाधि मत्वं। एवं गंधस्पर्श शब्दलक्षणानि। रूपादि चतुष्टयमिति। यथा योग मिति शेषः। तेन चतुष्टयस्य जलादौ बाधितत्वेपि नक्षतिः। एतच्चतुष्टय मुद्भूतं प्रत्यक्षं। द्रव्यस्तूद्भूतएव। उद्भूतत्वंच प्रत्यक्ष प्रयोजको धर्म विशेषः। पाकजमिति। पाकस्तेजः संयोगः। तेनपूर्व रूपादिकं नश्यति रूपाद्यंतर मुत्पद्यते। अनित्यत्वंच प्राग्भाव प्रति योगित्वे

सति ध्वंसप्रतियोगित्वं। एतेन यत्पाकजं तदनित्यमित्यनया व्याप्त्यातस्यानित्यत्वेसिद्धे पुनरनित्यपदं व्यर्थमिति शंकापरास्ता। पाकजश्यामरूप ध्वंसादौ व्यभिचारात्। मानव्यवहारेति। मानंपरिच्छेदः। द्रोणोव्रीहिः आढकोव्रीहिरित्यादि परिच्छेद्य परिच्छेदक भाव व्यवहारेष्वसाधारण कारणमित्यर्थः। कालवारणाया सा धारणेति। सा धारण कारणत्वच कार्यत्वावच्छिन्न कार्यता निरूपित कारण तावत्वं। कार्यत्व व्याप्य धर्मावच्छिन्न कार्यतानिरूपित-कारण तावत्वमसाधारण कारणत्वं। क्वचि पुस्तकेषु असाधारण पदं नास्ति। सएवपाठःसम्यगिति भाति। बुद्धावति व्याप्तिवारणाय संख्या परिमाण पृथक्त्व संयोग परत्वा परत्व लक्षणेषुसर्वद्रव्यवृत्तित्वेसतीति विशेषणस्यावश्यक तयातेनैव कालवारणात्॥ अणुमहदीर्घ ह्रस्वं चेति। गुणविभागेन तत्प्रयोजक गुण विभागः। कृतइति ज्ञेयं। अथवा भाव

प्रधानोनिर्देशः। अणुत्वं महत्वं दीर्घत्वं ह्रस्वत्वंचेत्यर्थः। तथा चाणुपरिमाणं परममहत्परिमाणं मध्यमपरिमाणं चेतिपरिमाणं त्रिविधं। दीर्घपरिमाणं ह्रस्वपरिमाणंचेति मध्यमपरिमाणं द्विविधमितिभावः। पृथग्व्यवहारेति। घटःपटात्पथगिति व्यवहारेत्यर्थः। संयुक्तेति। घटपटौसंयुक्तौ इति व्यवहारहेतुरित्यर्थः। संयोगो द्विविधः। कर्मजःसंयोगजश्च। आद्योहस्त पुस्तक संयोगः। द्वितीयोहस्त पुस्तक संयोगात्काय पुस्तक संयोगः। अयंचाव्याप्य वृत्तिः। अव्याप्य वृत्तित्वंच स्वात्यंताभाव समानाधिकरणत्वं। संयोग नाशेकेति। संयोग नाशा साधारण कारणत्व मित्यर्थः। तेनादृष्ट वारणं। संयोग भिन्नत्वेनापि विशेषणीयं। तेन हस्त घटादि संयोगस्य भूतल घटादि संयोग नाश हेतुत्वेपि नातिव्याप्तिः। कर्मवारणाय गुणपदं। प्रतियोगि नि धया संयोगस्य कारणत्वपक्षे संयोग नाश निष्ठजन्यता निरूपित तादात्म्यातिरिक्त संबं-

धावच्छिन्न कारणतावत्त्वं वाच्यं। विभागो द्विविधः। कर्मजो विभागजश्चेति। आद्यो हस्त पुस्तक विभागः। द्वितीयः काय पुस्तक विभागस्तज्जन्यः। दिक्कृते इति। दिक्काल ज्ञानेन दूरस्थत्व जेष्ठत्वादि ज्ञानंजायत इति परत्वा परत्व ज्ञाने। [illegible]ल ज्ञानस्य कारणत्वेन दिक्काल ज्ञानजन्य ज्ञान विषयत्व मित्यर्थः। आद्यपतनेति। पतने आद्यत्वंच स्वसमानाधिकरण पतन ध्वंसा समान कालिकत्वं। द्वितीयपतनादीनां प्राथमिक पतन ध्वंससमान कालिकत्वेन निरासः। वेगवारणाद्येति। सांसिद्धिक मिति। स्वभावसिद्धं संसिद्धं। संसिद्धमेव सांसिद्धिकं। स्वार्थेण्। चूर्णादीति। पिंडीभावो नाम चूर्णादे र्धारणाकर्षण हेतु भूतः संयोग विशेषः। तत्र स्नेह एवासाधारण कारणं नतु जलादि गतद्रवत्वं। तथासति दत्त सुवर्णस्य पिंडीभाव हेतुत्वं स्यात्। अदृष्टमपि सर्व कार्य निमित्त कारण मिति सांप्रदायिकाः। तद्धारणाय हेतुप

द्रव्यसाधारण कारणपरं। गुणपदंतु स्नेहो विशेष गुण इति द्योतनाय। बुध्यादि षट्कं स्पर्शांता: स्नेह: सांसिद्धिकोद्रवः। अदृष्ट भावनाशब्दा[illegible]कागुणा इत्युक्तेः। अदृष्टस्य सर्व कार्यसाधारण कारणत्वा भावपक्षे असाधारणत्वं नविवक्षणीयं। गुणपदंतु कालधारणायेति बोध्यं। ध्वन्यात्मक इति। ध्वनिः आत्मा स्वरूपं यस्यस ध्वन्यात्मकः। प्रकारांतरेणापि शब्दस्त्रिविधः। संयोगजः विभागजः शब्दजश्चेति। भेरीदंड दंड संयोगादिजः आद्यः। वंशादीपाद्वमाने दल द्वयविभाग जन्यश्चटचट शब्दो द्वितीयः। भेर्यादि देशमारभ्य श्रोत्रपर्यंतं वीचीत रंगन्यायेन शब्दा छब्दांतरोत्पत्ति जीयते। अतःसशब्दस्तृतीयः। शब्दः क्षणिकः स्वसजातीयोत्तर शब्द मुत्पाद्य पूर्व शब्दो नश्यतीति स्थितिः। सर्वव्यवहारेति। हेतुपदमसाधारण कारणपरं। तेन नकाला दावति व्याप्तिः। ज्ञानपदंतु संज्ञांतर कथनाय। अ

न्येतु इदमहं जानामीत्यनु व्यवसायसिद्धा ज्ञानत्व जातिरेव लक्षणं। सर्व व्यवहार हेतुरितिस्व
रूप कथन मित्याहुः। संस्कार मात्रेति संस्कारेतर साक्षाद जन्यत्वे सति संस्कार जन्यत्व सतिज्ञा
।२३॥ नत्व मित्यर्थः। सोयंघट इति प्रत्यक्षेतिव्याप्ति वारणाय सत्यंतं। ईश्वर प्रत्यक्ष वारणाय द्वितीय वि
शेषणं। संस्कार ध्वंसेति व्याप्ति वारणाय ज्ञानत्वं। योग्य विभु विशेष गुणानां स्वोत्तरोत्पन्नगु
ण नाश्यत्व नियमात्ध्वंसं प्रति प्रति योगिनः कारणत्वाद्वेतिन। कारण तावच्छेदक संबंधस्य स
मवायरूपत्वात्। अन्यथाऽसंभवात्। कार्य तावच्छेदक संबंधस्तु यथोचितः। वस्तुतउभयो
रपि समवायत्वेन ज्ञानपदंस्वरूपनिरूपणार्थं बोध्यं। योग्यत्वंच प्रत्यक्ष विषयत्वं अन्यदग्रे ॥२३॥
वक्ष्यते। संस्कारेतरात्ममनः संयोगादि जन्यत्वाद संभव वारणाय साक्षादिदिति। अव्यव-
धाने नेत्यर्थः। अनुभव जन्या स्मृति हेतु र्भावनेति वक्ष्यमाण त्वा दनुभव जन्या भावना आत्म-

निसूक्ष्म रूपेण चिरंतिष्ठति। कदाचित्सदृशादि दर्शने नतत्संस्कारोद्बोधो भवति। तदव्यवहितोत्तर क्षणमेव स्मृतिरुत्पद्यते। आत्ममनः संयोगस्तु जाग्रदवस्थायां सदा तिष्ठत्येवेतिन क्रिया। आत्ममनः संयोगादीनां नतथेति। ७। तद्भिन्नमिति। स्मृतिभिन्नमित्यर्थः। तद्वतीति। सप्तम्यर्थो विशेषकत्वं। तद्वद्विशेष्यकत्वेसति तत्प्रकारकत्वे सत्यनुभवत्वं यथार्थानुभवस्य लक्षणं। उभयत्र तत्पदेनैकस्येव परामर्शः। इदं रजतमिति भ्रमे रजतत्वस्य प्रकारत्वे नाति व्याप्ति वारणाय त्पर्यंतं। तत्रैव शुक्तित्व वच्छुक्ति विशेष्यकत्वेन तद्वारणाय द्वितीय सत्यंतं। स्मृति वारणाय विशेष्यं। ननु तथापि रंग रजतयोरिमे रंगरजते इति समूहालंबनात्मक भ्रमे रंगत्व वद्रंगस्य रजतत्व वद्रजतस्य विशेष्यत्वेन रंगत्व रजतत्वयोः प्रकारत्वेनाति व्याप्तिरिति चेन्न। तद्भिन्नष्ठ विशेष्यता निरूपित तन्निष्ठ प्रकारता शालित्वेति विवक्ष-

णात्। तत्र रंग निष्ठ विशेष्यता निरूपिता रंगत्व निष्ठा प्रकारता नभवति किंतुरजतत्व निष्ठा प्रकार तैव तादृशीतिनाति व्याप्तिः। ननु घटे घटत्व मिति शाब्द प्रमायाम व्याप्तिः। तत्र प्रथमांतार्थस्य विशेष्यत्वेन सहभ्यं तार्थस्य प्रकारत्वेन तद्वद्विशेष्य कत्वा भावा दितिचेन्न। तत्संबं धावच्छिन विशेष्यता निरूपित तन्निष्ठ प्रकार तावत्वस्य विवक्षितत्वात्। घटत्वे घटसं बंधो स्तीति नक्षतिः। सएवेति। यथा र्थानु भव एव प्रमेत्युच्यते नतु यथा र्थ ज्ञानसामान्यं तथासति यथार्थ स्मृतेरपि प्रामात्व प्राप्या स्मृति करणस्यानुभवस्य प्रमाणत्वाभावस्तेरित्यर्थः। तद्भाव वतीति। तद्भाव वद्विशेष्य कत्वे सतित प्रकारक त्वं लक्षणं। सएव भ्रम इत्युच्यते। ननुवृक्षः कपिसंयोगीति प्रमाया मति व्याप्तिः। संयोगस्या व्याप्य वृत्तित्वेन अग्रे वृक्षः कपि संयोगी मूले नेति प्रतीत्या कपिसंयोग तद्भाव योरपि वृक्षे सत्वादिति चेन्नैवं।

यदवच्छेदेन यत्संबंधावच्छिन्न प्रतियोगिता कयद्भावस्तदवच्छेदेन तत्संबंधावच्छिन्न त्प्रकारता ज्ञाल्यनुभवत्वस्य विवक्षितत्वात्। कपिसंयोगाभावावच्छेदकावच्छेदेन कपिसंयो गज्ञानस्य भ्रमत्वं। कपिसंयोगावच्छेदकावच्छेदेन कपिसंयोगसंबंधस्य सत्वात्तज्ज्ञानस्य प्रमात्वं। अव्याप्यवृत्तित्वंच स्वात्यंताभावसमानाधिकरणत्वं। इदमव्याप्यवृत्तिसंयोगादि प्रकारक भ्रमस्थले। व्याप्यवृत्तिरजतत्वादि प्रकारक भ्रमलक्षणंतु प्रकारतावच्छेदक संबंधावच्छिन्न प्रतियोगिताकतद्भावबन्निष्ठविशेष्यता निरूपित तन्निष्ठ प्रकारतावत्वे सत्यनुभवत्वं। पर्वतोवन्हिमानिति प्रमायां समवायेन वन्ह्यभाववत्पर्वतस्य विशेष्यत्वेपि अभावीय प्रतियोगितायां प्रकारतावच्छेदकसंबंधावच्छिन्नत्व निवेशाभाति व्याप्तिः। नापिरंगरजतयोरिमेरंग रजते इति प्रमायामति व्याप्तिः। रंगत्वादि प्रकारतायांरंगत्वाभाववद्विशेष्यता निरूपितत्वा

भावात्। तत्करणमपीति। प्रमाकरणमित्यर्थः। तथाच प्रमाकरणत्वं प्रमाजनकत्वं लक्षणमित्युक्तं भवति। असाधारणं कारणं करणमिति। इदं नवीनमतमिति प्राचेण। कालादृष्टादि कारणायासाधारणेति। यद्धि लंबात्समवायि सामग्री सत्वेपि कार्यानुत्पादस्तत्कारणस्यैवासाधारणकारणत्वात्। व्यापारत्वे नाभिमतस्येंद्रियार्थसंयोगादेरपि करणत्वमिष्टमेव। अतएव तदेतत्त्रिविधकारणमध्येयदसाधारणकारणं तदेव करणमितिस्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्शएवकरणमितिचोत्तरग्रंथोलगति। तथाचफलायोगव्यवच्छिन्नं कारणं करणमिति। प्राचस्तु। व्यापारवद्असाधारणकारणं करणं। व्यापारस्तज्जन्यत्वेसतितज्जन्यजनकः। प्रत्यक्षे इंद्रियंकरणं सन्निकर्षो व्यापारः। नचश्रोत्रेव्याप्तिः श्रोत्रमनःसंयोगस्य तत्र व्यापारत्वातु श्रोत्रशब्दसंबंधानंतरमेव श्रोत्रमनःसंयोगस्या

नुभाविकत्वात्। इंद्रियार्थसंयोगाद्भावपि कालस्य कारणत्वेन व्यापारवत्वात्तद्वारणाया-साधारणेतीत्याहुः। कार्यं नियतेति। नियतत्वंच व्यापकत्वं। कार्यं व्यापकत्वे सति कार्य-पूर्ववृत्तित्वमितियावत्। कार्यपदं व्याप्य व्यापक भाव पूर्वापरी भाव योर्निरूपकत्वात्स्व-रूप निरूपणार्थं। रासभादावति व्याप्ति वारणाय नियतेति। कार्येति व्याप्ति वारणा-य कार्यपूर्ववृत्तीति। कार्यतावच्छेदक संबंधेन कार्याधिकरणे कार्याव्यवहित प्राक्क्षणा वच्छेदेन विद्यमानात्यंताभावा प्रतियोगित्वं कार्यपूर्ववृत्तित्वं। ननु तथापितंतुरूपं पटंप्र तिकारणं स्यात्। तत्रापिकार्य नियतपूर्ववृत्तित्व सत्वादितिचेन्न। अनन्यथा सिद्धत्वेस तीति विशेषणात्। स्वतंत्रान्वय व्यतिरेक शून्य त्वेसति कार्यपूर्ववृत्तित्व मन्यथा सिद्धत्वं यथा पटंप्रति तंतु रूपं ततुत्वं. आकाशः कुविंदपिता। तंतुरूपसत्वेपट सत्वं तंतुरूपाभा

वे पटाभाव इत्यन्वय व्यतिरेकौनस्तः। किंतु तंतु सत्वे पट सत्वंतंत्व भावे पटा भाव इत्येव। कार्य कारणभावस्थले कारणपुरस्कारेण न्वय व्याप्तिः कारणाभाव पुरस्कारेणैव व्यतिरेक-व्याप्तिः। ज्ञाप्य ज्ञापक भावस्थलेतु कार्यपुरस्कारेणान्वय व्याप्तिः कारणाभाव पुरस्कारेण व्यतिरेक व्याप्तिरिति नियमः। तंतुत्व संग्रहाय सतंत्रेति। तत्रकारण तावच्छेदक रूपेणान्वय व्यतिरेक सत्वात्। कारणाभासस्यैवान्यथासिद्धत्वंन तुपटं प्रतिघटस्य। अन्यथा सिद्धेः कारणा निषेधकत्वेन कारणत्वेन प्रती तस्यैवनिषेधोनत्व प्रतीतस्यैत्यर्थ द्योतनायकार्य पूर्ववृत्ति त्वमिति। नचकारणलक्षणे इदानीं नियतपदं मास्त्विति वाच्यं। रासभस्य घट सामान्यं प्रत्य न्यथा सित्वासंभवायत्र घटे रासभः कारणं तत्रानन्यथा सिद्धत्वे सति पूर्ववृत्तित्व सत्वादति व्याप्तेः। रासभो घटं प्रति नकारण मित्येव सिद्धांत इतिकेचित्। यत्समवेत मिति। [illegible]

नू समवायेन वर्तमानमित्यर्थः। अनेन कार्यतावच्छेदकसंबंधः समवाय इतिस्यात्। जन्य भावत्वावच्छिन्नं प्रतिता दात्म्येन द्रव्यस्य कारणत्व नियमात्ता दात्म्यं कारण तावच्छेदक संबंधः। तथाच समवायसंबंधावच्छिन्न कार्यता निरूपित तादात्म्य संबंधावच्छिन्न कारण तावत्वं समवायि कारणस्य लक्षणं। असमवा।ये कारण वारणाय तादात्म्य संबंधावच्छिन्नत्वं। निमित्त कारण वारणाय समवाय संबंधावच्छिन्नत्वं। समवायि कारणत्वं द्रव्यस्यैव। कारणे नवेति। प्रकृत कार्य समवायि कारणे नेत्यर्थः। कार्य कारणयोः [illegible] धटकारण्य घटक संबंधस्यैव कार्यकारण तावच्छेदक संबंधत्वेन तंतु संयोगपटयोः समवायेनैव सामानाधि करण्यात्समवाय संबंधावच्छिन्न कार्यता निरूपित समवाय संबंधावच्छिन्न कारण तावत्वं। पटरूप तंतु रूपयोस्तु तंतौसामानाधि करण्यात्कार्य तावच्छेदक संबंधः स्वा

॥ २७ ॥

अथ समवायः। कारणतावच्छेदकसंबंधः समवायः। तथाच स्वाश्रय समवाय संबंधावच्छिन्न कार्यता निरूपित समवाय संबंधावच्छिन्न कारणतावत्वं। अनुगत लक्षणंतु समवाय स्वाश्रय समवायान्यतर संबंधावच्छिन्न कार्यता निरूपित समवाय संबंधावच्छिन्न कारणता शालित्वं। आत्मविशेषगुणानां नकस्याप्य समवायि कारणत्वं। अकस्मात्ते कारण नाशात्कार्य नाशइति नियमात्। तदभयभिन्नमिति। समवायि कारण भिन्नत्वे सति कारणत्व मित्यर्थः। कार्य वारणाय कारणत्वं। ननु काल घट संयोग समवायी कारणे काले व्याप्तिरितिचेन्न। समवायि कारणता भिन्ना असमवायि कारणता भिन्ना या कारणता तद्धत्वस्य विवक्षितत्वात्। काले घट संयोग निरूपिता समवायि कारणता तन्निरूपित निमित्त कारणतात्र भिन्नैव। प्रत्यक्ष ज्ञान करण मिति। अयंघट इत्या कारक ज्ञानंफल भूतं प्रत्यक्षं। तत्र करण मिंद्रियं त

दपि प्रत्यक्ष शब्द वाच्यं। करण प्रत्यक्ष मित्यर्थः। तदेव प्रमाणं तच्च करणं क्वचि दिंद्रियं क्वचिदिंद्रियार्थ सन्निकर्षः क्वचिज्ज्ञानं। तत्रेंद्रिय मात्रं निर्विकल्पके घटत्व ज्ञाने। व्यापारस्तु संयुक्त समवायः। द्वितीयस्तु सविकल्पक ज्ञाने। निर्विकल्पक ज्ञानं व्यापारः। तृतीयंच सविकल्पक ज्ञानानंतरं जायमानेषु हानो पादानो पेक्षा बुद्धिषु निर्विकल्पक ज्ञानं। तत्र व्यापारः सविकल्पक ज्ञानं। हानं दुःख साधनत्व ज्ञानं। यथा दृश्यि कोमे दुःख [illegible] ज्ञानं। उपादानं च सुख साधनत्व ज्ञानं। यथा कांतादौ। उपेक्षाचो भया साधनत्व ज्ञानं। यथा तृणादौ। फल प्रत्यक्षं लक्षयति। इंद्रियार्थेति। आत्मा मनसा संयुज्यते मन इंद्रियेणेंद्रियमर्थेन ततः प्रत्यक्ष मुत्पद्यते इत्यर्थ प्रत्यक्षे। आत्मा मनसा संयुज्यते मन इंद्रियेण ततः प्रत्यक्ष मिंद्रिय प्रत्यक्षे। आत्मा मनसा संयुज्यतेततः प्रत्यक्ष मित्यात्म मा[illegible]त्यक्षे। न[illegible]कार

कं ज्ञानमिति। तुरीयविषयतानिरूपकस्य निर्विकल्पकज्ञानस्यविशेष्याद्विविधयाविशेष्या-
धनवगाहित्वाविरूपकतासंबंधेन प्रकारताशून्यत्वं विशेष्यताशून्यत्वंसंसर्गताशून्यत्वं
॥२८॥ चेतिविनिगमनाविरहालक्षणत्रयंबोध्यं। एकत्रपक्षपातिनीयुक्तिर्विनिगमना। निर्विकल्प
कज्ञानसत्वेनप्रत्यक्षंप्रमाणं। अतींद्रियत्वात्। किंत्वनुमानमेव। तथाहि घटइतिविशि
ष्टज्ञानंविशेषणज्ञानजन्यंविशिष्टज्ञानत्वात् दंडीतिविशिष्टज्ञानवत्। विशेषण
ज्ञानस्यापिसविकल्पकत्वेनवस्थाप्रसंगान्निर्विकल्पकसिद्धिः। विशिष्टबुद्धिंप्रतिविशे
षणज्ञानस्यकारणत्वान्नाप्रयोजकतांका। सविकल्पकस्यविशिष्टबुद्धित्वेनविशेषणज्ञान ॥२८॥
जन्यत्वनियमात्। अयंनिर्विकल्पकोयथार्थायथार्थभिन्नस्तुरीयविषयतयाविलक्षणा
नुभवइतिनव्याः। यथार्थइतिप्राचः। तदुभयमपीतिगौडदृधाः। समकारकंज्ञानमि

ति। नामजात्यादिविशेष्यविशेषणसंबंधावगाहितयानिरूपकतासंबंधेनविशेष्यता
वत्त्वंप्रकारतावत्त्वंसंसर्गितावत्त्वंचेतिलक्षणत्रयमत्रापि। डित्थोयमित्यत्र नामप्रकारतयाभासते।
ब्राह्मणोयमित्यत्रजातिः। श्यामोयमित्यत्रगुणः। पाचकोयमित्यत्रक्रिया। प्रत्यक्षज्ञानहेतुरिति।
हेतुपदमसाधारणकारणपरं। तेननाद्दष्टादाबतिप्रसंगः। अव्यापारित्वेनविशेषणीयं। नहि
नेंद्रियेष्वतिव्याप्तिः। अथवाहेतुपदमेवव्यापारपरं। तथाचेंद्रोक्तदोषः। श्रोत्रेणशब्दसाक्षा
त्कारइति। ननुदूरस्थशब्दस्यकथंश्रोत्रसंबंधः। नचात्रश्रोत्रस्याकाशरूपत्वेनसमवायसंबं
धत्वेनतत्संबंधइतिवाच्यं। अतिप्रसंगात्। अतःकर्णशष्कुल्यवच्छिन्नाकाशानुयोगिकत्वविशि
ष्टसमवायस्यैवशब्दप्रत्यक्षहेतुत्वांगीकारादूरस्थशब्दस्यकथंतत्संबंधइतिचेन्न।
भेर्यादिदेशमारभ्यश्रोत्रपर्यंतंवीचीतरंगन्यायेनशब्दाख्यतेजोद्रव्योत्पत्तेस्तस्यश्रोत्रसंबं

धात्। भेरीदंडादिसंयोगादेकशब्दोत्पत्तिः। तस्मादनेकवादास्तेभ्यश्च तथेति सजातीयानां शब्दानांदिक्षुव्याप्तिः। वीचीस्वल्पतरंगोत्पादकादोसुखेद्वयोर्दिनिमेदिनी। बुद्धिरिच्छासु रवंकुरवमदृष्टंभावनाकृतिः। एतेआत्मगुणाअशेषशब्दक्षणिकामताः। सोत्तरैश्वर्यगुणेनि त्यायोग्याविभुगुणाइमे। एकदानुभवाभावान्नतेषांयुगपत्स्थितिरित्युदयनाचार्याः। विशेषणविशेष्यभावइति। सचविशेषणविशेष्यस्वरूपमेव। नातिरिक्तस्संबंधः। एवंसन्निकर्षजन्यमिति। इदंलौकिकप्रत्यक्षज्ञानं। तथाचप्रत्यक्षंद्विविधं। लौकिकमलौकिकंचेति लौकिकत्वंचविषयताविशेषः। अथसन्निकर्षोनिरुक्तः षड्विधः। कारणंकरणमिंद्रियं। अलौकिकेपिकरणमिंद्रियं। प्रत्यासत्तिर्व्यापारः। साचत्रिधा। सामान्यलक्षणाज्ञानलक्षणा योगजधर्मश्चेति। सामान्यंजातिस्तज्ज्ञानं वालक्षणं स्वरूपंयस्याःसेतिव्युत्प

स्यापर्वतोवह्निमान् धूमादित्यादौ धूमत्वरूपात ज्ञानरूपावाप्रत्यासत्तिः। असन्निकृष्टानामिंद्रियाणां प्रत्यक्षजनकत्वेनातीतानागतधूमादिषुचक्षुःसंयोगादेरभावात्तदाश्रयाणांनिरवयवभूतादिनामलौकिकप्रत्यक्षेधूमत्वरूपसामान्यलक्षणप्रत्यासत्तिः कारणं। ज्ञानलक्षणातुसुरभिचंदनंखंडइतिचाक्षुषोपनीतभानेकारणं। चक्षुषःसौरभेणयोग्यसन्निकर्षाभावात्। योगजधर्मस्तुयोगिनांदेशकालविप्रकृष्टपदार्थप्रत्यक्षेकारणीभूता प्रत्यासत्तिः। धर्मःपुण्यं॥ ॥इतिश्रीतर्कसंग्रहव्याख्यानेपदार्थसागरेकृष्णावधूतपंडितकृतौप्रत्यक्षपरिच्छेदःसमाप्तः॥ ॥ श्रीगुरुभ्योनमः॥ प्रत्यक्षोपजीवकत्वादनुमानस्य प्रत्यक्षनिरूपणानंतरमनुमानंनिरूप्यते। अनुमितिकरणमिति। अनुमिनोमीत्यनुव्यवसायसिद्धानुमितिकरणमित्यर्थः॥ प्रथमं व्याप्तिज्ञानं। ततोलिंगपरामर्शः। ततोनुमितिः।पर्वतोवह्निमान् धूमान्महानसवदित्यत्र

यत्र धूमस्तत्राग्निर्यथा महानसइतिव्याप्तिज्ञानं। वह्निव्याप्यधूमवानयंपर्वतइतिपरामर्शज्ञानं व्यापारः। पर्वतो वह्निमानित्यनुमितिः फलं। अनुपश्यान्मितिकरणत्वमुपमानादेवर्तत इति तद्व्यवच्छेदाय पर्वते वह्निमनुमिनोमीत्यनुव्यवसायसिद्धानुमितिर्विवक्षिता। इदं प्राचीनमते। नवीनमते तु लिंगपरामर्शः प्रत्यनुमानं। व्याप्तिविशिष्टेति। हेतोः पक्षवृत्तित्वं पक्षधर्मता। व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं च व्याप्तिविशिष्टपक्षधर्मताज्ञानं। पक्षधर्मताज्ञाने व्याप्तिवैशिष्ट्यं च स्वनिष्ठप्रकारतानिरूपितविशेष्यत्वाभिन्नप्रकारतावत्संबंधेन। पक्षधर्मताज्ञानं द्वेधा। पक्षेव्याप्यवानिति पक्षेव्याप्य इतिच। तत्घटितपरामर्शोपि द्विविधः॥ व्याप्तिनिष्ठप्रकारतानिरूपितहेतुनिष्ठविशेष्यत्वाभिन्नप्रकारतानिरूपितपक्षनिष्ठविशेष्यताश्रयालिंगज्ञानं। यथावह्निव्याप्यधूमवानयंपर्वत इति। तेनपक्षनिष्ठ

विशेष्यतानिरूपितसाध्यनिष्ठप्रकारतात्वाच्छाब्दानुमितिर्जायते। यथा पर्वतो वह्निमानिति। द्वितीयंतु व्याप्तिनिष्ठप्रकारतानिरूपितहेतुनिष्ठविशेष्यताभिन्नविशेष्यतानिरूपितपक्षनिष्ठप्रकारताशालिज्ञानं। यथावह्निव्याप्यधूमः पर्वतेइति। तेनपक्षनिष्ठप्रकारतानिरूपितसाध्यनिष्ठविशेष्यतात्वाच्छाब्दानुमितिर्जायते। यथापर्वतेवह्निरिति। उभयविधानुमितिंप्रत्युभयविधपरामर्शःकारणं। तत्तद्व्यवहितोत्तरत्वनिवेशान्नपरस्परंव्यभिचारः। एवंचवह्नित्वावच्छिन्ननिरूपितव्याप्तित्वावच्छिन्नप्रकारतानिरूपितधूमत्वावच्छिन्नविशेष्यताभिन्नसंयोगसंबंधावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिपरामर्शत्वावच्छिन्नजन्यपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितित्वावच्छिन्नंप्रतिवह्नित्वावच्छिन्ननिरूपितव्याप्तित्वा

वच्छिन्नप्रकारतानिरूपितधूमत्वावच्छिन्नविशेष्यतासंबंधावच्छिन्नप्रकार
तानिरूपितपर्वतत्वावच्छिन्नविशेष्यतासंबंधावच्छिन्नपरामर्शत्वावच्छिन्नकारणं। वह्नित्वा
वच्छिन्ननिरूपितव्याप्तित्वावच्छिन्नप्रकारतानिरूपितधूमत्वावच्छिन्नविशेष्यतासं
न्नविशेष्यतानिरूपितपर्वतत्वावच्छिन्नप्रकारतापरामर्शत्वावच्छिन्नजन्यतावच्छे
दकं। तत्रावच्छिन्नप्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यतापरामर्शत्वमुभयसाधारणं
नंप्रति वह्नित्वावच्छिन्ननिरूपितव्याप्तित्वावच्छिन्नप्रकारतानिरूपितधूमत्वावच्छि
न्नविशेष्यतासंबंधावच्छिन्नविशेष्यतानिरूपितपर्वतत्वावच्छिन्नप्रकारतापरामर्शत्वा
वच्छिन्नं कारणमित्येके। अन्येतूभयसाधारणंव्याप्तिनिष्ठविषयतानिरूपित
हेतुनिष्ठविषयत्वाभिन्नविषयतानिरूपितपक्षनिष्ठविषयतापरामर्शज्ञानं परामर्शः

॥२१॥

तेनपक्षनिष्ठविषयतानिरूपितसाध्यनिष्ठविषयतानिरूपितसाध्यानुमितिर्जायते।उभयविधप
रामर्शादपिपक्षःसाध्यवानित्येवानुभविकत्वात्।एवंचपर्वतोवह्निमान्धूमादित्यत्र
पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्नित्वावच्छिन्नविधेयता का
नुमितित्वावच्छिन्नं प्रति वह्नित्वावच्छिन्ननिरूपितव्याप्तित्वावच्छिन्नप्रकारतानिरूपितविशे
ष्यत्वाभिन्नसंयोगसंबंधावच्छिन्नधूमत्वावच्छिन्नविषयतानिरूपितपर्वतत्वावच्छिन्नवि
षयताशालिनिर्णयत्वावच्छिन्नं कारणमिति॥ इतिपरामर्शीवादः॥ व्याप्तिलक्षणमा
ह॥ साहचर्यनियमइति॥ साहचर्यंसमानाधिकरण्यंतस्यनियमःअव्यभिचरित्त
वंतस्यव्यभिचाराभावः। सचसाध्याभाववद्वृत्तित्वाभावरूपः। इदंव्याप्तिस्वरूपनिरूपणं।
तत्थेतो लक्षणसमन्वयः। वह्निमान्धूमादित्यत्रसाध्यंवह्निःसाध्याभाववन्नभावः

तदधिकरणवृत्तिः। तन्निरूपितवृत्तिमान्यो वालपंकजादौ तदभावः धूमेऽतिलक्षणसमन्वयः
व्यभिचाराभावस्यैव व्याप्तित्वेन तज्ज्ञानार्थं व्यभिचारज्ञानमावश्यकमिति असंभवो व्य
भिचारलक्षणसमन्वयस्त्वतिव्याप्तिः वारणं बोध्यं। यथाधूमवान्वह्नेरित्यत्रातिव्या
प्तिः। साध्यंधूमः साध्याभावः धूमाभावः तदधिकरणमयोगोलकं तन्निरूपितवृत्तिमान्धूम
स्य तदभावो नास्तीति। साध्याभावीय प्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वं
साध्यतावच्छेदकावच्छिन्नत्वंनिवेशनीयं। तेनसमवायेनवह्न्यभावमादायवह्निधू
माभावमादायच वह्निमान् धूमादित्यत्रनाव्याप्तिः। साध्याभावाधिकरणनिरूपितवृ
त्तितायांहेतुतावच्छेदकसंबंधावच्छिन्नत्वंनिवेश्यं। तेनवह्निमान् धूमादित्यादौव ॥२॥
ह्न्यभावाधिकरणेधूमावयवेसमवायेनधूमस्यसत्वेपि नाव्याप्तिः। ननैवंद्रव्यंगुण-

कर्मान्यत्वविशिष्टसत्तादित्यादौ विशिष्टशुद्धान्नातिरिच्यत इति न्यायात् विशिष्टसत्तायाः शुद्धे सत्तायाश्चैक्येन द्रव्यत्वाभावाधिकरणे गुणादौ शुद्धसत्तायाः सत्वेन गुणकर्मान्यत्वविशिष्टसत्तापि वर्तत एवेति तदभावो नास्तीत्यव्याप्तिरिति वाच्यं। वृत्तित्वाभावइत्यस्य वृत्तितानवच्छेदकं यत्ते तुतावच्छेदकं तदवच्छिन्नत्वेनात्पर्यात्॥ तथाच तादृशसाध्याभावाधिकरणगुणादिनिरूपितवृत्तितावच्छेदकं शुद्धसत्वं। तदनवच्छेदकं यत्ते तुतावच्छेदकमित्युक्ते गुणकर्मान्यत्वविशिष्टसत्त्वमिति नाव्याप्तिः। एतेनोदासीनेपर्वतत्वादावपि नातिव्याप्तिः। साध्याभावाधिकरणपदं अधिकरणतावच्छिन्नपरं। तेनधूमवान्वह्नेरित्यादिस्थलेधूमाभावाधिकरणह्रदनिरूपितवृत्तित्वाभावेपि अधिकरणतावच्छिन्नांतर्गतायोगोलकनिरूपितवृत्तित्वस्यैव तत्वेन वह्नेर्नातिव्याप्तिः॥

तथा च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्याभावाधिकरणतावच्छिन्नप्रतियोगितानिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तितानवच्छेदकं यद्धेतुतावच्छेदकं तदवच्छिन्नत्वं व्याप्तिः। ननु सत्तावान् जातेरित्यादौ साध्याभावाधिकरणसामान्यादौ हेतुतावच्छेदकसमवायेन वृत्तित्वाप्रसिद्ध्या व्याप्तिः। नन्वहेतुतावच्छेदकस्वरूपान्यतरसंबंधेन वृत्तितावक्षितेति वाच्यं। तथापीदं वाच्यं ज्ञेयत्वादित्यादौ साध्याभावाप्रसिद्ध्या व्याप्तिरिति चेन्न। यत्र धूमस्तत्राग्निरिति निर्देशो न हेतुव्यापकत्वं साध्येऽपि वक्तिमितिहेतुव्यापकसाध्यसामानाधिकरण्यरूपव्यभिचाराभावस्य व्याप्तित्वेन विवक्षणात्। तथा च हेतुसमानाधिकरणाभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः। वह्निमान् धूमादित्यादौ हेतुर्धूमः केवलान्वयिकरणं पर्वतादिस्तद्वृत्तिर्योऽभावः। नहि पर्वतभावः। तत्रवह्नेः सत्त्वात्। अभावस्य प्रतियोगिना सार्कं विरोधात्। अपितु घटाद्युदासीनाभावः। तत्प्रतियो

गीघटादिः अप्रतियोगीसाध्यंवन्हिः। तत्सामानाधिकरण्यंधूमेइतिलक्षणसमन्वयः। धूमवान्वन्हे
रित्यत्रवन्हौनातिव्याप्तिः।हेतुर्वन्हिः हेत्वधिकरणमयोगोलकंतद्वृत्तियोतंताभावः धूमाभावः तत्प्र
तियोगीधूमः अप्रतियोगीयत्साध्यंधूमोनभवतितादृशधूमसामानाधिकरण्यंवन्हौनास्तीति।अ
प्रतियोगिसाध्येत्यनेनप्रतियोगितानवच्छेदकंयत्साध्यतावच्छेदकंतदवच्छिन्नेत्यर्थोविवक्षितः। ते
नवन्हिमान्धूमादित्यादौतत्तद्व्यक्तिभावमादायकालनीन्यायेनसर्ववन्हीनांतादृशाभावप्रतियो
गितेपिवन्हित्वस्यतदनवच्छेदकत्वान्नक्षतिः।हेतुनिष्ठाधेयतायांहेतुतावच्छेदकसंबंधावच्छिन्नत्वंहे
तुतावच्छेदकावच्छिन्नत्वंचनिवेशनीयं। अन्यथावन्हिमान्धूमादित्यादौसमवायेनधूमाधिकर
णतदवयववृत्त्यभावप्रतियोगित्वेनवन्हेर्व्याप्तिः। विशिष्टस्यशुद्धानतिरेकितयातदधिकरणगुणा
दिवृत्त्यभावप्रतियोगित्वेनद्रव्यत्वस्यद्रव्यंगुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्राव्याप्तिः॥हेतुता

वच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः। अभावीयप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेशनीयं। तेन वह्निमान् धूमादित्यादौ समवायेन धूमाभावमादायनाव्याप्तिः। नच तथापि पर्वतत्वाद्युदासीनेति व्याप्तिरिति वाच्यं साध्यसामानाधिकरण्यमित्यस्य साध्याधिकरणनिरूपितवृत्तितावच्छेदकं यद्धर्मस्तदवच्छिन्नत्वमिति विवक्षणात्। नन्वेवमपि कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगस्याव्याप्यवृत्तित्वेनहेतुसमानाधिकरणत्वाद्व्याप्तिरिति वाच्यं। अभावे प्रतियोगिवैय्यधिकरण्यस्य विशेषणात्। तच्च स्वप्रतियोग्यनधिकरणवृत्तित्वं। इत्थं च स्वप्रतियोग्यनधिकरणं यद्धेतुतावच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणनवृत्तिसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकं यत्साध्यता वच्छेदकं त

दवच्छिन्न साध्याधिकरणनिरूपितवृत्तितावच्छेदकं यत्रेतुतावच्छेदकं तदवच्छिन्नत्वं व्याप्तिः। सत्रेतु स्थलेउदासीनपदार्थभावमादाय लक्षणसमन्वयः। व्यभिचारिस्थलेसाध्याभावमादायाति व्याप्तिवारणं॥ इतिव्याप्तिवादः॥ पक्षधर्मतास्वरूपमाह। व्याप्यस्येति। हेतोरित्यर्थः। स्वार्थमिति। स्वः स्वकीयः अर्थः साध्यसंशयनिवृत्तिरूपः प्रयोजनं यस्येति व्युत्पत्त्यास्वीयसंशयनिवृत्तिजनकमित्यर्थः। एवमेवपरार्थमिति। स्वपरशब्दयोरात्मात्मीयान्यान्यदीयपरतयार्थिकव्यधिकरणबहुव्रीह्यपेक्षया

औत्सर्गिकाधिकरण बहुव्रीहेरेव न्याय्यत्वं। न्या[illegible]र्थानुमानं। न्यायप्रयोज्यंपरार्थानुमानं। पंचावयवसमुदायोन्याय अवयवत्वंचप्रतिज्ञाद्यन्यतमत्वं। भूयोदर्शनेनेति। व्यभिचारज्ञानाभावसहकृतसाध्यसामानाधिकरण्यज्ञानेनेत्यर्थः। नतुबाहुल्येनसाहचर्यज्ञानंव्याप्तिग्राहकं। पार्थिवत्वलोहलेख्यत्वयोः शतशःसाहचर्यदर्शनेपिहीरकेव्यभिचारात्। तच्चव्यभिचारज्ञानंनिश्चयःसंदेहश्च। व्यभिचारसंशयस्यापि व्याप्ति

ग्रह प्रतिबंधकतानुभवात्। तद्धिरहस्तुइदंवाच्यं प्रमेयतादित्यादौस्वतःसिद्धत्वान्न तर्कमपेक्षते। व
ह्निमान् धूमादित्यादौ तु धूमान्यो व्याप्तिग्रहेऽपेक्ष्यमाणे तर्कः व्यभिचारशंकानिवर्तकः। य
दिवह्निर्नस्यान्नहिधूमोपि नस्यात्। तयोःकार्यकारणभावात्। व्यभिचारशंकैवाप्रयोजकशंके
त्युच्यते। तन्निवारकःयद्धिधूमोवह्नि व्यभिचारीस्यान्नहिवह्नि जन्योनस्यादि त्याकारकः कार्य
कारणभावभंगप्रसंगलक्षणस्तर्कः। ननुमहानसीयवह्नि धूमयोःसन्निकृष्टत्वेन सहचारप्रत्यक्षेपि
सर्वेषांवह्निधूमानामसन्निकृष्टत्वेनप्रत्यक्षासंभवात्कथं पर्वतीयवह्नि धूमयोर्व्याप्तिस्मरणं।
स्मरणस्यसंस्कारजन्यत्वेन संस्कारस्यप्रत्यक्षजन्यत्वेन पूर्वपर्वतीयवह्निधूमव्याप्तेः प्रत्यक्षाभावादि
तिचेन्न। सकलवह्निधूमेषु लौकिकसंन्निकर्षाभावेपि सामान्यलक्षणप्रत्यासत्त्या अलौकिकसं
न्निकर्षसत्त्वाद्वह्नित्वावच्छिन्न सामानाधिकरण्येननिखिलवह्निधूमव्याप्तिप्रत्यक्षसंभवात्सर्वतो

॥२५॥

यधूमेपि व्याप्तेर्गृहीतत्वेनधूमदर्शनेनव्याप्तिस्मरणसंभवात्परामर्शोपपत्तेः। परार्थानुमानमाह तत्त्विति। न्यायप्रयोज्यंपरार्थानुमानं। न्यायस्तंप्रतिज्ञाद्यवयवपंचकसमुदायस्तं। ननुपरार्थानुमानमित्यस्य परस्यार्थःप्रयोजनं येनेतिव्युत्पत्त्यापरसमवेतानुमितिकरणत्वंपरार्थानुमानलक्षणं भवति। न च लिंगपरामर्शएव। स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्शएवकरणमितिवक्ष्यमाणत्वात्। अतःकथमत्रपंचावयववाक्यत्वंपरार्थानुमानस्योक्तमितिचेन्न। यत्तच्छब्दयोःपंचावयववाक्यपरतयाविवक्षाभावात्। नुशब्दस्यहेतुपरत्वात्। तथाचतुयस्मात्स्वयंधूमादग्निमनुमायपरंप्रतिबोधयितुंपरस्यलिंगपरामर्शमुत्पादयितुंपंचावयववाक्यंप्रयुङ्क्तेतस्मात्कारणात्यत्पंचावयववाक्यजन्यलिंगपरामर्शज्ञानं भवति तत्परार्थानुमानमित्यर्थः। कर्मप्रवचनीययुक्तेयोगात्परमितिद्वितीया। परप्रतिप्रत्यर्थमितिपाठेपरस्यपरामर्शार्थमित्यर्थः। अनेनपंचावयववाक्येन। प्रतिपादितात्।

ज्ञापितात्लिंगात्। लिंगपरामर्शात्। प्रतिज्ञेति। साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकबोधजनकं वाक्यं प्रतिज्ञा। उदाहरणवाक्यार्थेतुविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानं। नतुपक्षतावच्छेदकविशिष्टेइतिनतत्रातिव्याप्तिः। पंचम्यंतं लिंगप्रतिपादकवाक्यंहेतुः। व्याप्तिप्रतिपादकंवाक्यमुदाहरणं। योयोधूमवान्ससोग्निमान्यथा महानसइत्यत्रप्रथमयत्पदार्थमहानसेद्वितीययत्पदार्थमहानसान्यसिंध्यप्रकृतहेतुमत्त्वस्य तत्पदार्थमहानसेतदन्यत्रचसाध्यस्यवन्हिमत्त्वस्यचशाब्दबोधेजातेसत्युत्तरकालेसाध्येहेतु व्यापकताबोधोमानसोभवतीतिव्याप्तिप्रतिपत्तिजनकत्वमुदाहरणवाक्यस्य। पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकप्रकृतसाध्यव्याप्यहेतुप्रकारकबोधजनकवाक्यंउपनयः। हेतुज्ञानज्ञाप्यसाध्यवद्विषयकबोधजनकवाक्यंनिगमनं। पर्वतोवन्हिमानितिप्रतिज्ञावाक्यपर्वतत्वावच्छिन्न

विरोध्यकवह्नित्वावच्छिन्नप्रकारकबोधजनकत्वं। तथाचायमिति। अयंपर्वतत्वावच्छिन्नः तथाच प्रकृत साध्यवह्निव्याप्यधूमवान्। तस्मात्तथेति। तस्मात्वह्निव्याप्यधूमवत्तात्। तथाधूमज्ञान ज्ञाप्य वह्निमान्। निगमनोत्तरकाले अबाधितत्वात्तत्प्रतिपत्तितत्त्विषयकबोधो मानसोभवति। लिंग परामर्शः। लिंगज्ञानं। व्याप्तिविशिष्टलिंगप्रकारकपक्ष विशेष्यकज्ञानमित्यर्थः। लिंगस्यत्रैविध्ये ज्ञाते तत्परामर्शज्ञानस्यत्रैविध्यमर्थात्सिध्यतीत्यभिप्रायेण लिंगंविभजते। लिंगंत्रिविधमिति। अन्वयेनव्यतिरेकेण चव्याप्तमिति। अन्वयोनामयथाश्रुतयोर्हेतुसाध्ययोः सहचारग्रहभाजेन ग्राह्याव्याप्तिरन्वयव्याप्तेः। प्रकृत्यादिभ्यउपसंख्यानमिति तृतीया। तदर्थः ज्ञानग्राह्यत्वं। यथा श्रुतहेतुसाध्यसहचारग्रहग्राह्यव्याप्तिमत्त्वमित्यर्थः। व्यतिरेकोऽभावः। यथाश्रुतसाध्याभावहेत्व भावसहचारग्रहग्राह्यव्याप्तिमत्त्वं व्यतिरेकव्याप्तिमत्वं। हेतुव्यापकसाध्यसामानाधिकरण्यमन्वय

व्याप्तिः। साध्याभावव्यापकीभूताभावप्रतियोगितावच्छेदकं यथेतुतावच्छेदकंतदवच्छिन्नत्वं व्यतिरेकव्याप्तिः। साध्यंवन्हिः साध्याभावः वन्ह्यभावः तव्यापकीभूतो योऽभावः। धूमाभावः तत्प्रतियोगितावच्छेदकं यथेतुतावच्छेदकं धूमत्वं तदवच्छिन्नत्वं धूमे। अन्वयव्याप्तिमात्रकमिति। व्यतिरेकव्याप्तिशून्येसत्यन्वयव्याप्तिमत्वमित्यर्थः। पृथिवीतरभिन्नागंधवत्वादित्यत्रपंचावयववाक्यानिदर्शयति। यथेति। प्रतिज्ञावाक्यंहेतुवाक्यंचान्वयव्यतिरेकपरामर्शयोःसमं। उदाहरणोपनयनिगमनवाक्यानि व्यतिरेकबोधजनकानि। नचेयंतथेति। इयंपृथिवीतथा जलादिवद्गंधाभाववतीनचेत्यर्थः। तस्मान्नतथेति। गंधवत्वादितरभेदाभाववतीत्यनेत्यर्थः। व्यतिरेकपरामर्शस्तुसाध्याभावव्यापकाभावप्रतियोगिहेतुमान्पक्षइति। नन्वभावज्ञानंप्रतिप्रतियोगिज्ञानस्यकारणत्वेनतदर्थंप्रतियोगिप्रसिद्धेरपेक्षणीयतयाइतरभेदाप्रसिध्या कथंव्यतिरेकव्याप्तिग्रहः व्यतिरेक-

परामर्शग्रहस्यानुमितिम्प्रतिचेन्न। जलादीनांयेजलादिषुप्रत्येकंप्रसिद्धाश्चतुर्दशान्योन्याभावास्तेषांकूटस्यसाध्यत्वादिति नदोषः। संदिग्धसाध्यवानिति। साध्यप्रकारकसंदेहविशेष्यत्वंपक्षत्वं। इदंबोधः। ननुयत्रवह्निप्रत्यक्षेपि पर्वतेवह्निमनुमिनोमीतिइच्छयापर्वतोवह्निमानित्यनुमितिर्जायते। तत्रैतादृशपक्षताभावाव्यभिचारः। घनगर्जनेनमेघानुमितिस्थलेपीतिचेन्न। सिसाधिषाविरहविशिष्टसिध्यभावरूपपक्षताश्रयत्वस्य पक्षलक्षणत्वादिति नव्याः। तादृशसिध्यभावस्यानुमितिप्रतिबंधकत्वं तादृशसिध्यभावस्यानुमितिकारणत्वं। पक्षतावच्छेदकावच्छेदेनानुमितिंप्रतिपक्षतावच्छेदकसामानाधिकरण्येनसिधिर्नप्रतिबंधिका। पक्षतावच्छेदकावच्छेदेनसिधिरेवप्रतिबंधिका। पक्षतावच्छेदकसामानाधिकरण्येनानुमितिंप्रतिसिधिमात्रंप्रतिबंधकं। साधयितुमिछासिसाधयिषा। साधयतेरिछायांसन्प्रत्ययः। यत्रसिधिरस्तिसिसाधयि

षाप्यस्ति तत्रसिसाधयिषाविरहरूपविशेषणाभावाद्विशिष्टाभाव इतिसिसाधयिषाविरहविशिष्टा
व्याः सिद्धेरभावोस्तीत्यनुमितिर्भवति। यत्रसिद्धिर्नास्तिसिसाधयिषापिनास्ति तत्रसिद्धिरूप
विशेष्याभावात्सिसाधयिषाविरहविशिष्टसिध्यभावरूपपक्षतावर्ततइत्यनुमितिः। यत्रसिद्धि-
र्नास्तिसिसाधयिषावर्तते तत्रसिसाधयिषाविरहरूपविशेषणाभावात्सिद्धिरूपविशेष्याभा
वाच्चेत्युभयाभावप्रयुक्तविशिष्टाभावोस्तीति पक्षताव्याप्यानुमितिः। यत्रसिद्धिरस्तिसिसाध
यिषानास्ति तत्रविशेषणविशेष्ययोरुभयोः सत्वेनविशिष्टाभावोनास्तीति पक्षतायाअभावान्ना
नुमितिः। यादृशसिसाधयिषासत्वेसिद्धिसत्वे यल्लिंगकानुमितिस्तादृशसिसाधयिषाविरहविशि ॥५॥
ष्टसिध्यभावस्तल्लिंगकानुमितौ पक्षतेतिवक्तव्यं। तेनसिद्धिपरामर्शोभयकालेयत्किंचिज्ज्ञानं
जायतामितिसिसाधयिषायामपिनानुमितिः। सिसाधयिषाविरहकालेयादृशसिद्धिसत्वेनानु-

मितिस्तादृशसिद्धिर्विलक्षणीया। तेनपर्वतस्तेजस्वीपाषाणमयोवह्निमानित्याकारकसिद्धिसतेपि-
पर्वतोवह्निमानित्यनुमितेर्नविरोधः निश्चितेति। साध्यप्रकारकनिश्चयविशेष्यतंसपक्षत्वं। उभ
यत्रसाध्यनिष्ठप्रकारतायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंसाध्यतावच्छेदकावच्छिन्नत्वंचनिवे
शनीयं। तेनमहानसादौसमवायेनवह्नेरसत्वेपिपर्वतीयवह्न्यादेरसत्वेपिनक्षतिः निश्चितसा
ध्याभावेति। साध्याभावप्रकारकनिश्चयविशेष्यत्वंविपक्षत्वं। अभावीयप्रतियोगितायांसाध्य
तावच्छेदकसंबंधावच्छिन्नत्वं साध्यतावच्छेदकावच्छिन्नत्वंचदेयं। अन्यथासमवायेनवह्न्यभावमादा
यपर्वतीयवह्न्यभावमादायचमहानसादौसपक्षेतिव्याप्तिः। तत्वनिर्णयविजयप्रयोजनकं
हेत्वाभासनिरूपणंप्रसंगतः करोति। सव्यभिचारेति। हेतुवदाभासंतेसहेतुरिवहेतुलक्ष्म
कारकत्वमविषयाभवंतीति व्युत्पत्याहेत्वाभासपदेनैवदोषवत्त्वरूपसामान्यलक्षणस्योक्त

तेनसामान्यधर्मप्रकारकज्ञानमंतराविद्वेषजिज्ञासानुदयेनविभागोनुपपन्नइतिशंकापरास्ता।
हेतुत्वंचव्याप्तिपक्षधर्मतादिमतेसतिपंचम्यंतराब्दप्रतिपाद्यत्वं।दोषत्वंचयद्विषयकज्ञानंप्रकृता
नुमितिप्रतिबंधकंतत्। तद्वत्वंचहेतोस्तज्ज्ञानविषयप्रकृतहेतुतावच्छेदकवत्वसंबंधेन। एकहेतौ
व्यभिचारज्ञानेपिहेत्वंतरेणानुमित्युत्पत्तेः प्रकृतेति।दोषज्ञानं यथेतुविषयकं तथेतुकानुमितीत्य
र्थः। यत्तदंयद्रूपावच्छिन्नपरं। तत्वं तद्रूपावच्छिन्नत्वं।अन्यथापर्वतोवह्न्यभाववानितिभ्रमवि
षय वन्ह्यभावमादायसद्धेतोरपिदुष्टतापत्तिः।यद्रूपपदेनबाधतादेरेवविवक्षणात्तत्रयद्रूपावच्छि
न्नलक्षणतिः। अथयाज्ञाननिष्ठयद्रूपावच्छिन्नविषयताव्यापिका प्रकृतानुमितिप्रतिबंधकता त ॥२३॥
द्रूपावच्छिन्नत्वं दोषत्वं। वन्ह्यभावेति व्याप्तिवारणाय यद्रूपावच्छिन्नेति।विशिष्टस्यस्वरूपातिरेकेण
तदवच्छिन्नविषयतामादायासंभववारणाय व्यापिकेति। ज्ञानपदमनाहार्यप्रामाण्यज्ञानभा

स्कंदित निश्चय परं। तेनाहार्यादि ज्ञान मादाय नासंभवः। अनुमिति पदमजहल्लक्षण यानुमिति परामर्शो भयपरं। साध्य व्याप्य हेतुमान्पक्षः साध्यवानिति समूहालंबनादनुमितिरिति परंवा। तेन बाध ज्ञानस्य व्याप्यभूतिबंधकत्वेपि नक्षतिः। यद्वा अनुमितेर्य तेबंधक यथार्थ ज्ञान-विषयत्वं दोषत्वं। कामिनीजिज्ञासा वारणाय ज्ञानेति। सत्धेतौ बाधादि भ्रममादायातिव्याप्तिवारणाय यथार्थेति। यथार्थत्वंच सर्वांशे। तच्च स्व व्यधिकरण प्रकारावच्छिन्नाया याविद्येष्यता तत्तद निरूपकत्वं। तेन बाध भ्रमस्य किंचिदंशे यथार्थेपि नक्षतिरितिसंक्षेपः। स्व व्यभिचारस्य संज्ञांतर माह। अनेकांतिक इति। साध्याभाववदवृत्तिरिति। साध्य तावच्छेदक संबंधावच्छिन्न निरवच्छिन्न साध्याभावाधिकरणनिरूपित हेतु तावच्छेदक संबंधावच्छिन्ना धेयतावत्त्व मित्यर्थः। वन्हिमान्धूमादित्यादौ समवायादिना वन्ह्याद्य भावमादायातिव्याप्ति

वारणाय साध्यतावच्छेदकसंबंधावच्छिन्नत्वं साध्याभावीयप्रतियोगितायां निवेश्यं कपि संयोगी एतद्वृक्षत्वादित्यत्राति व्याप्तिवारणाय निरवच्छिन्नत्व निवेशः। द्रव्यत्वादित्य त्र संयोगादिक मादाय व्याप्ति वारणाय हेतु तावच्छेदक संबंधावच्छिन्नत्वं॥ इदमुक्तं लक्षणं साध्य वदन्यवृत्तित्व हेतु समानाधिकरणाभावप्रतियोगित्व मित्यादि बो ध्यं। इदंव्यभिचा र ज्ञान मन्वय व्याप्ति ज्ञान प्रति बंधकं। सर्वसपक्ष व्यावर्त इति सपक्षनिरूपित वृत्तित्व सामा न्याभाव वानित्यर्थः। अयोगोलक मादाय धूमरूप सद्धेतु वारणाय सामान्यपदं। विपक्ष-व्यावृत्त इति पाठे धिकेतु विरुद्ध वारणाय तदिति। इदमसाधारण ज्ञानंसपक्षावृत्तितया हे-तोः पक्षांत र्भविण व्याप्ति राक्षिप्ता तत्र साध्य संदेहाव्याप्ति संशयो भवतीति व्याप्ति ज्ञान प्र ति बंधक मिति ग्रंथ कारा शयः। यदापक्षे साध्य संशयस्तदा साधारण्यं दोषः। यदानिश्चय

स्वरूपासाधारण्यमिति प्राञ्चः। नव्यास्तु सपक्षपदं केवलसाध्यवत्परं। साध्यासामानाधि-
करण्यमसाधारण्यं सिद्धांते व्याप्यंशे सामानाधिकरण्यग्रहे प्रतिबंधकमित्याहुः। अन्वय
व्यतिरेक दृष्टांतरहित इति। सर्वत्रापि पक्षत्वे नव्यानैः स्थलांतराभावात्संशयाधायक-
त्वेनोभयव्याप्तिप्रतिबंधः फलमिति प्राञ्चः। नवीनास्तु केवलान्वयि साध्यकत्वं केवलान्वयि
हेतुकत्वं वातुपसंहारित्वं। व्यतिरेक व्याप्ति प्रतिबंधा नीति। साध्याभावव्यापकत्वं
वद्वृत्तित्वमित्यर्थः। निश्चितसाध्यवद्वृत्तित्वं दासाधारण्यस्य भेदः। साध्याभावव्यापकत्व
रूप व्याप्ति ज्ञान प्रतिबंधक इति प्राञ्चः। नव्यास्तु साध्याभावस्य व्यतिरेक व्याप्ति ज्ञानमि
त्यर्थः। साध्य व्यापकीभूताभाव प्रतियोगित्वरूपत्वादासाधारण्य भेदः। व्यतिरेक व्याप्ति ज्ञा
न प्रतिबंधक इत्याहुः। अन्ये नव्यास्तु पक्ष विशेष्यक साध्याभाव व्याप्य हेतु प्रकारक ज्ञाने

जाते साध्याभाव ग्रह सामग्रीत्वेन साक्षा दनु [illegible] तेबं धक इति । साध्या भाव साधकं हे त्वंतर मिति । साध्याभाव व्याप्य वत्पक्षः सत्प्रतिपक्षः अस्य साध्याभाव ग्रह सामग्रीत्वेन साक्षादनुमिति प्रतिबंधकत्वं । विरोधे एक हेतोः साध्याभाव साधकत्वं । अत्रतु प्रातेहे स्तथेति तयो र्दूषकता बीजैक्येपि भेदः । आश्रयासि द्ध इति । आश्रयः पक्षतावच्छेदकावच्छिन्नपक्षः असिद्धो यस्येति विग्रहः । पक्षतावच्छेदका भाववत्पक्ष आश्रयासिद्धिः तद्वान् हेतुराश्रयासिद्धः । सचनास्त्येवेति । सविशेषणे हि विधिनिषेधौ विशेषणमुप संक्रामतः स्वरूपशब्दे बाधे इति न्याये नारविंदे गगनीयत्वंनास्तीत्यर्थः । अत्रगगनीयत्व वदरविंदं स्मरभीत्यनुमितिय गगनीयत्व वदरविंद मित्याकारक ज्ञानं प्रतिगगनीयत्वा भाववदरविंद मित्यसिद्धि ज्ञानस्य प्रतिबंधकत्वेन साक्षादनुमिति प्रतिबंधकत्वं । पक्षधर्मताज्ञान विघटक तया परामर्श-

ज्ञान प्रतिबंधकमितिनव्याः। स्वरूपासिद्धेश्च येति। हेत्व भा[illegible]: प[illegible]द्यन्ते हेतुर्वा स्वरूपासिद्धिः। पक्ष धर्मता विघटकतया परामर्शं प्रतिबध्नाति। सोपाधिक इति। उपाधिनासहितइत्यर्थः। उपाधिः समनियतः द्युत्व साध्य व्यापकत्वे सति साधना व्यापकः पक्ष धर्मावच्छिन्न साध्य व्यापकत्वे सति साधना व्यापकः साधनावच्छिन्न साध्य व्यापकत्व सति साधनाव्यापकः उदासीन धर्मावच्छिन्न साध्यव्यापकत्वे सति पक्षावृत्ति साधन [illegible]त्वेसति पक्षावृत्तिश्चेति। आद्योयथा। धूमवान्वन्हेरित्यत्राद्रेंधन संयोगः। अयं व्यभिचारोनायकः सत्प्रतिपक्षोनायकश्च। यत्र हृत्धसाध्य व्यापक उपाधिस्तत्र हृत्धेनोपाधि व्यभिचारेण साध्यव्यभिचारानुमानं। यथा। वन्हिः धूम व्यभिचारी धूम व्यापकाद्रेंधन संयोग व्यभिचारित्वाद्द्रटत्ववदिति। योयद्व्यापक व्यभिचारी सतद्व्याप्य व्यभिचारीति। आद्रेंधन संयोगैं धूमव्या

पकत्वे ज्ञाते धूमे आर्द्रेंधन संयोग व्याप्यत्वं ज्ञायते। आर्द्रेंधन संयोगे वान्हे मद्वृत्तित्व-
रूप वन्ह्य व्यापकत्वे ज्ञाते वन्हौ आर्द्रेंधन संयोग व्याप्यत्वं ज्ञायते। आर्द्रेंधन संयोगा-
भाव वद्वृत्तित्व रूपो पाधि व्यभिचारित्वे हेतौ ज्ञाते उपाधि व्याप्यसाध्य व्यभिचारित्व ज्ञा
नं सुतरां भवत्येवेति व्यभिचारो व्यापक तयाव्याप्ति ज्ञान प्रतिबंधकः सत्प्रतिपक्षेतु पक्षाध्यभा
वे नसाध्या भावानुमानं। यथा। अयोगोलकं धूम वद्वन्हेरित्यादौ अयोगोलकं धूमा भाव
वदार्द्रेंधन संयोगा भावा दिति। द्वितीयस्तु वायुर्बहिरिंद्रियप्रत्यक्ष विषयः प्रत्यक्ष स्पर्श
श्रयत्वाद्घट वदित्यत्रोद्भूतरूपवत्त्वमुपाधिरित्युक्तमेव पक्षधर्मस्तु पक्ष दृष्टांतो भय सा
धारणो बोध्यः। तेन वान्हिमान् धूमादित्यादौ महानसान्यस्वरूप पक्ष धर्मा वच्छिन्न साध्य
व्यापकत्वेपि महानसहा भावोनो पाधिः। दृष्टव्येत्यथा। ध्वंसो नाशवान् जन्यत्व दित्यत्र-

जन्यत्वावच्छे[illegible] नाशव्यापकत्वाद्भावत्व मुपाधिः। अयं व्यभिचारोभायक एव। जन्यत्वं नाश व्यभिचा रि जन्ये भावत्व व्यभिचारित्वात्। भावत्वाभाव नाशा भावयोः प्रागभावे व्यभिचारेण न सत्प्रतिपक्षोत्थापकः। चतुर्थोयथा। गगनं क्रि यावत् भूतत्वाद्घट वदित्यत्र विशेष गुणत्वावच्छि न्न साध्य व्यापकत्वात्स्पर्श वत्व मुपाधिः। अयमपि व्यभि चारोभायक एव। भूतत्वं क्रिया व्यभि चारी विशेष गुणा श्रयेस्पर्शवत्व व्यभि चारित्वादिति। नस त्प्रतिपक्षो भायकः। मनसि व्य भिचारात्। पंचमोयथा। वायुर्गंधवान्वायु त्वादित्यत्रसत्वं। अयं व्यभिचारोभायकः।स त्प्रतिपक्षोभायको विरो धोभायकश्च। वायुत्वं गंध व्यभिचारित्वात्। वायुर्गंधाभाव वान् रू- पाभावात्। वायुत्वंगंधाभाव व्याप्तं गंध व्यापक रूपाभाव व्याप्तत्वाद्घट वदिति। षष्ठोयथा। वायुर्गंधवान् स्पर्शाद्घट वदित्यत्र रूपवत्वं। अयंसत्प्रतिपक्षोत्थापक एव। वायुर्गंधाभाववा

नू रूपाभावादिति । नतु व्यभिचारोऽभावकः । पक्षांतर्भावेण व्यभिचारस्यासंभवात् । करका पृथिवी कठिनसंयोगवत्वादित्यत्रानुष्णाशीतस्पर्शवत्वंसमस्तः । अयंसत्प्रतिपक्षोत्थापकः करका पृथिवी नभवति अनुष्णाशीतस्पर्शाभावात् । नतु व्यभिचारोऽभावकः । हेतुः साध्यव्यापकत्वात् । नैतेषु स्वरूपासिद्ध्यादिनाचारितार्थ्यादुपाधिवैयर्थ्यशंका । सर्वत्राप्युपाधेर्दूषणांतरसांकर्यात् । ननुसाध्याप्रसिद्धिर्हेत्वप्रसिद्ध्योः सत्वात्कथमसिद्धिर्नेति चेदुच्यते साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः । यथा पर्वतः कांचनमयवह्निमानित्यत्रवह्नौ कांचनमयत्वाभावः । हेतौ हेतुतावच्छेदकाभावः हेत्वप्रसिद्धिः । यथा पर्वतोवह्निमान् कांचनमयधूमादित्यत्र धूमे कांचनमयत्वाभावः । व्याप्तिपक्षधर्मताज्ञानप्रतिबंधिका । पूर्वातु व्याप्तिज्ञानप्रतिबंधिका । उभयोरपि व्याप्यत्वासिद्धावंतर्भावः । व्याप्यत्वस्य व्याप्तिमतस्या

सिद्धिरिति विग्रहात्। साध्याभावः प्रमाणांतरेण निश्चित इति। पक्ष इति शेषः। साध्याभाववत्पक्षो बाधः। अस्य ज्ञात्वाभावगाहितया साक्षादनुमिति प्रतिबंधकत्वं। तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयस्य प्रतिबंधकत्वं यथा ह्रदो वन्हिमानिति ज्ञानं प्रति ह्रदो वन्ह्यभाववानिति ज्ञानं प्रतिबंधकं। तद्वत्ताबुद्धिं प्रति तदभाव व्याप्यवत्तानिश्चयस्य प्रतिबंधकत्वंच। यथाह्रदो वन्हिमानिति ज्ञानं प्रति ह्रदो वन्ह्यभावं व्याप्य जलवानिति ज्ञानं प्रतिबंधकं। ननु साध्यसिद्ध्यभावस्य साध्यसिद्ध्यनुमिति प्रतिबंधकत्वात्कथं हेतुदोषाणां पंचत्वनियमोनेन। साक्षात्प्रतिबंधकेन करणान्यतर प्रतिबंधकस्यैव हेत्वाभासत्वेन विवक्षणात्। उपाधिस्तु व्यभिचार सत्त्वेपि पक्षान्यतर द्वारानुमिति प्रतिबंधकः। साध्यासिद्धिस्तु प्राचीन मते साध्य संशय रूपपक्षता विघटक द्वारानुमिति प्रतिबंधिका। नवीन मतेतु निग्रह स्थानांतरं। इतिश्री कृष्णावधूत पंडित कृ-

तौ तर्कसंग्रह तात्पर्यप्रकाशे पदार्थसागरे अनुमानपरिच्छेदः समाप्तः॥

श्रीगुरुभ्योनमः॥ अथावसरप्राप्तमुपमानं लक्षयति। उपमितिकरणमिति। संज्ञायदं। संज्ञी अर्थः। तयोः संबंधः शक्तिः। सादृश्यज्ञानंउपमानं। अतिदेशवाक्यार्थस्मरणंव्यापारः। सादृश्यादर्थबोधकं वाक्यमतिदेशः। गोसदृशवस्तुदर्शनादतिदेशवाक्यार्थस्मरणंजायते। तदनंतरं अयंगवयपदवाच्य इतिशक्तिग्रहोजायत इतिसादृश्यज्ञानस्योपमितिकरणत्वं। उपमिनोमिउपमया जानामीत्यनुव्यवसायसिद्धज्ञानमुपमितिः। इतिकृष्णावधूतपंडितकृतौ तर्कसंग्रहतात्पर्यप्रकाशे पदार्थसागरेउपमानपरिच्छेदः॥ ५॥

॥४४॥

उपमानेन शक्तिग्रहोजायते। ततः शाब्दबोधइति फलनिष्ठोपजीव्योपजीवकभावस्यस्वाश्रयकरणत्वसंबंधेनोपमानशब्दवृत्तित्वादुपजीव्योपजीवकभावसंगत्या शब्दं निरूपय

ति। आप्तवाक्यमिति। इदं प्रमाण शब्दस्य लक्षणं। सामान्य लक्षणंतु शाब्द प्रमितिक रणत्वं। शाब्द बोधः फलंपद जन्य पदार्थोपस्थिति र्व्यापारः। शब्द ज्ञानं करणं। ननु ज्ञायमा न शब्दः। मौनि श्लोके व्यभिचारात्। यथाचैत्रगामानयेति शब्द ज्ञानात् पदार्थोपस्थिति- र्जायते। कथं। आनयेत्यस्माद्धूस्क नीङ् धात्वर्थः आनयनं। तच्च दूरदेश विभाग प्रयो ज्य समीपदेश संयोगः। तस्याख्याता र्थ कृतावनुकूलता संबंधेना न्वयः। गामित्येत्र द्वि तीया र्थः कर्मत्वं। तच्चाश्रितत्व रूपं। तस्य धात्वर्थेन्वयः। तिवर्थकृतेश्चैत्रे समवाये नान्व य इति। तस्मात् गोनिष्ठ दूरदेश विभाग प्रयोज्य समीपदेश संयोगानु कूल कृत्याश्रयश्चै त्र इतिशाब्द बोधः। आप्तलक्षण माह। यथार्थवक्तेति। यथार्थं वक्तेति द्वितीया समासः। न लोका व्ययनिष्ठा खलर्थ तृनामेति षष्ठी निषेधात्। तृच्पक्षे तृजका भ्यां कर्तरीति षष्ठीस

मास ।नेधात्। अर्थमनितिक्रम्य यथार्थ। प्रकृत वाक्यार्थ विषयक यथार्थ ज्ञानवत्व-
मित्यर्थः। पदलक्षणमाह। शक्तिमिति। शक्ति निरूपक मित्यर्थः। शक्ति [illegible] माह। अ
स्मादिति। संकेतः इच्छा। एतत्पद जन्य बोध विषयोयमर्थ इत्य [illegible] छेत्यर्थः। ईश्वरप
दंतु संकेता धायक मात्रे तात्पर्य वत्। अन्यथा धुनिक संकेत निरूपक चे [illegible] दात्व
शेष बो धो नस्यात्। नचद्वादशे हनि पिता नामकुर्यादित्यादि नात्रा। वे सा मान्या कारेणश्व
र संकेत इतिवाच्यं। नदीद ध्यादि संज्ञार्या तद भावात्। अतः संकेत एव शक्तिः। जात्या
दिव्यक्तयःपदार्थ इत्युक्त्वा जाति विशिष्ट व्यक्तौशक्तिः। ननु मीमांसक वद्व्यक्ति विशेषण
तया जातेः प्रथमोपस्थितत्वा ज्जातावेव गवादि पदानां शक्तिः। व्यक्ति लाभस्त्वा [illegible] ति।
तथासति गामानयेत्यादौ इतरव्यवहारेणा नयनादेरेक व्यक्तावेव संभवे नानेक गवानयन-

प्रसिद्धः। शक्तिर्नाम [illegible] इत्यर्थः। [illegible] णक्यर्थो गोशब्द व्युत्पत्त्या न्यङ्गु गो [illegible] तदभावश्च [illegible] त्। अत्र [illegible] धेयं। पदेपार्थोपचेदिति [illegible] सं [illegible] संबंधेन प [illegible] ष्ठा। विषयता संबंधेनार्थनिष्ठा। इति धा। शक्तिर्ज्ञान आकरणा [illegible] नाभवति। शक्ति यद्वा [illegible] गोपमान कोशा [illegible] पत्तेश्च। [illegible] सिध्यत्सिध [illegible] वृथा इत्युक्तेः। व्याकरणाद्यथा। लः कर्मणि च भावे चाकर्मकेभ्य इति प्रत्ययाः शक्तस्य [illegible]। उपमानाद्यथा। कि यद्वत्कृत एव। केशाद्यथा। अरे कदल हेरब लबोद्र गजानन इति [illegible] धेरंब प स्य गणेशे शक्तेः। आप्तवाक्याद्यथा। हंसोमरालपदवाच्य इति आप्तवाक्या [illegible] पदस्य हंसे शक्तेः। व्यवहारतोयथा। [illegible] रः क्रिया। गामानयेति प्रयोजक वृद्धेनोक्तः प्रयोज्य वृद्धः गामानयति। गांनयाश्वमानयेति पुनरपि प्रयोजक-

रत्थे नोक्त स्तथा करोति । तद्दृष्टु बालस्य गवाश्वे व्यक्तिविशेषयोः सास्नादेर्भत्वैक शफादिम
त्व वि।शे-न्योर्गोपदस्याश्वपदस्यच शक्ति ग्रहोभवति । वाक्य शेषाद्यथा । यवमयंचरुं निर्वप
तीत्यत्र यव शब्दो रत्थ व्यवहारा द्दीर्घशूकवि शिष्ट व्रीहि वाचक: अथ वा श्लेष्म व्यवहारात्ते
यंगु वाचक: अथवा कर्नाट व्यवहारात्क्षेत्र गो धूम वाचक इति संशये ।
नां जायतेपत्र शातनं । मोदमानाश्चतिष्ठंति यवा: कटिका शालिन इति वाक्य शेषा द्दीर्घशू
कवि शिष्टे शक्ति ग्रहः । विवरणाद्यथा । पचतीत्यस्य पाकं करोतीति यत्नार्थक क
रोति ना सर्वारब्या तव्यारब्या नादारब्या तस्य यज्ञे शक्ति ग्रहः । सिद्धपदसान्निध्या द्यथा । वा
डवो वेदपाठक इत्यत्र वेदपाटक समानाधिकरणत्वा द्वाडववाक्यस्य पाठके शक्ति ग्रहः ।
पाठकत्वंचाध्यापकत्वं । तेनक्षत्रियादि वारणं । कर्तृस्थ ज्यते । यथाल: कर्तरी

वच्छेदक लाघवात् लकारस्य ऋतावेव शक्तिः। सर्वनाम संज्ञक शब्दानांतु। इदमेतच्छब्दयोः प्रत्यक्षबुद्धि[illegible] शक्तिः। अदः शब्दतच्छब्दयोः परोक्षबुद्धिविषये। किंपदस्य जिज्ञासाविषये। सर्वपद व्यापकत्वे। सर्वपदार्थ भवंत इत्यादौ [illegible] भवत्प्रभृति[illegible] व्यापकत्वस्य भवार्थक[illegible] अन्या[illegible] नाभेदविशिष्ट। त्वंपद[illegible] तत्काल[illegible] बोध्ये चैत्रादौ। अहंपदस्य तत्कालीने स्वतंत्रोच्चारयितरि। स्वातंत्र्यं चैतन्यात्तत्कल्प एव वस्तुनामसरा[illegible] इत्यत्र ममेति प[illegible] कर्तृबोधः। कर्तुः सातंत्र्यं चैतन्यरूपस्वतंत्रोच्चारणकर्तृत्वं भावः। सैंधवादिपदानां तिनिगमना विरहभाना शक्तिर्लक्षणाश्चयोः। नचैकत्र लक्षणा। परस्परसंबंधाभावात्। अनेकार्थ[illegible] वक्तृविवक्षिते शक्तिग्रहे संयोगा[illegible] सहकारा। तदुक्तं भर्तृहरिणा। संयोगोविप्रयोगश्च साहचर्यं विरो-

धिता। अर्थः [illegible] भिधेः। सामर्थ्यं [illegible] कालो व्यक्तिः व्या.

[illegible] शब्दार्थस्य [illegible] तिहेतव इति। स्वव्यक्त [illegible] र्थान्तरबोधः सोऽ

॥४७॥ वाः। यथा शरचक्र [illegible] धस [illegible]। अत्र शरशब्दो [illegible] ष्णस्वरूपार्थे शरचक्रसंबंधाधारि

[illegible] पर्यवसितविष्णुबोधः। तदुक्त [illegible] विषयागः। अशरचक्रः [illegible] हारः। स्वव्यक्त्येकवस्तु

निष्ठवस्त्वंतर [illegible]। [illegible]। [illegible] नेकार्

थ [illegible] ष्ण साहचर्यज्ञाना शरार्थबोधः। सहानवस्थानं वध्यहे [illegible] विरोधिता।

[illegible] सं [illegible] ध्य रामोजे [illegible] ज्ञानं। निशाशब्दस्य रात्रिहरिद्रोभयवाचकत्वेऽपि दिन ॥४७॥

नि [illegible] योः स [illegible] वस्थानाभावज्ञाना द्रात्रि श [illegible] न निशाबोधः। रामरावणयोर्हंतृवध्यत्वज्ञा-

नाद्रामपद [illegible] शरार्थबोधः। अर्थः [illegible] नं। [illegible] संसारछेदायभजे। [illegible] ष्ण स्वरूपार्थी

कत्वेपि संसार[illegible] ज्ञाना द्वासुदेव बोधः। षट्त्व वार्थ प्रकरणं। भोजन काले सै
ध[illegible] युक्तेसै धव पदाद्धव पा बोधः। स्वाच्चै[illegible] दिनिः इमौलिंगं। आत्म
भूः केन ज[illegible] कुपितोमकर ध्वजः। आत्म[illegible] पदस्य काम ब्रह्मो भय वाचकत्वेपि मकर ध्वज
त्व लिंगात् मन्मथ बोधः। प्रसिद्ध शा[illegible] सम भिव्याहारोन्य शब्द संनिधिः। राम सीसापतिं
भजे। सामर्थ्य कारणत्वं। मत्ता म[illegible] पि मदहतुत्व ज्ञानान्न शब्दाद्ध संत-
बोधः। औचित्यन्व ययो[illegible] त्वं। गच्छत्यारुह्यसैधवं। देशः पुरादिः। राजामगरे राजते।
कालो निशादिः। रात्रौ विः भानुः प्र[illegible] दात। पुंलिंगादिर्व्यक्तिः। मित्र उदयति। मत्र वा-
व्दस्य सखि वाचकत्वे न[illegible] सकत्वं सूर्य वाचकत्वे[illegible] लिंगत्वं। उदात्तादिः स्वरः। इंद्र शत्रो वर्ध-
स्व। आद्युदात्ते षष्ठी तत्पुरुषः। अंतोदात्ते बहु[illegible] हिः। आदिना अस्थादि[illegible] स्वनं। शक्ति-

त्रिविधा। रूढिर्योगोयोग[illegible]। तत्र पंकजं पदंतु चतुर्विधं। [illegible] योग रूढं- यौगिक रूढिकमिति। अवयवार्थानुसंधान मंतरार्थ बोधिका शक्तिः रूढिः। तद्रूढं। गोमं [illegible]। अवयवार्थानुसंधाने नैवार्थ बोधिका [illegible] शक्तिर्योगः। य [illegible] पाचक पदे। अवयवार्थ [illegible] र्थो भय बोधिका शक्तिर्योगरूढिः। त [illegible] योगरूढं पंकज [illegible] पदं। [illegible] पंकज निकर्तृ रूपार्थ बोधः। [illegible] शक्त्या पद्म बोधः। योगरूढ्योर्मध्ये रूढेः प्राबल्यान्न मुदादि बोधः। पंकजं कुमुदमित्यादौ साभिध्याद्रूढ्यर्थस्य बाधेनु संधीयते ऽतो लक्षणया कुमुद बोधः। साभिध्या भावेपि कुमुदत्वेनैव बोधे तात्पर्य चेत्तर्हि पद्मत्वस्य बाधादवयव शक्ति मात्रेण निर्वाहे पंकज पदात्कुमुद बोधः। प्रेयसो विरह पांडुरांनन शारदं विकच पंकजं यथा। यत्रतु यौगिकार्थ रूढ्यर्थयोः स्वातंत्र्येण बोधस्तत्र [illegible] रूढं। कुशलादि पदं।

कुशा। व कर्तर्यवयव ।त्या बोधः। निपुणेतु रूढ्या। इति ।क्तवादः। शक्य संबंधो लक्षणा। सा द्विविधा। निरूढ लक्षणा ल लक्षणेति। शुद्धागौणीति। निरूढ लक्षणा द्वेधा। शक्यार्थ निरूपित सादृश्य घटक गुण संबंध रूपाचे दोनी। गुणनिधि रित्यत्र निधि सादृश्य घटक पूर्णत्व धर्म संबंधः। तद्भिन्न संबंध श्चेति शुद्धा। पुष्य धन्वा काम इत्यत्र पुष्य विकारादिः। लक्षणा रूढ प्रयोगे प्रयोजनं यत्र दृश्यते तत्र फल लक्षणा। सा द्विविधा। जहल्लक्षणा अजहल्लक्षणाचेति। शक्यार्थ त्याग पूर्वक मन्यार्थस्य तत्संबंधिनोयत्र तात्पर्यं तत्र जहल्लक्षणा। तथाच स्वनिष्ठ लक्ष्यतावच्छेदक रूपावच्छिन्न विषयता निरूपकत्व स्वान्य शक्यार्थ निष्ठ विषयत्वा निरूपकत्वो भयसंबंधेन लक्ष्य विशिष्ट बोध प्रयोजकत्वं जहल्लक्षणात्वं। अजहल्लक्षणा वारणाय द्वितीय संबंधः। प्राचीन वेदांतिनां मते जहदजहल्लक्षणांगीकारात्तद्वा-

रणा। वच्छेदक रूपावच्छिन्ने ति। [illegible] स्यतावच्छेदक रूपण बोधाभावात्। नैय्या व्या.
यिक मतेतु श[illegible]त्याग पूर्वक तदन्वयानुयोग[illegible] संबंध एव जहल्लक्षणा। साचि[illegible]ता
संबंधेनपदे। सोयं देवदत्त इत्वा[illegible]। तत्पद श[illegible] [illegible]ांशस्य त्यागः विशेष्यस्या भेदे
नायं पदार्थेन्वयः। नव्यास्तु घटोनित्य[illegible]त्यादौ घटत्वस्यैव सोयं देवदत्त इत्यादौ तत्तांशस्योप
लक्षणतया भाने नकिंचिद्बाधक मिति जहद् जहल्लक्षणा न[illegible]ते वेति। अन्येनवीनास्तु निरूपण
शत्यागेपि शक्यार्थ त्यागसंभवाज्जहल्लक्षणेवेत्याहुः। जहल्लक्षणाचतुर्विधा। केवलासारोपा- ॥४९॥
साध्यवसाया लक्षित लक्षणेति भेदात्। केवलाजहल्लक्षणाद्यथा। गंगायांघोषः घोषःआ
[illegible]न्ही। गंगापदस्य तीरे लक्षणा। लाक्षणिक पदप्रयोग प्रयोजनंतु शीतलत्व पावनत्वा-
दि। सारोपाद्विविधा। गौणी शुद्धेति। उपात्तयोरर्थयोरभेद बोधिकासादृश्य घटक गुणसंबं

धरूपिणी। अग्निर्माणवक इत्यादौ सादृश्य षष्ठ्यादि संबंधेन तयोरभेद बोधः। तद्भिन्न संबंधरूपतयोरभेदबोधिका इत्यादयः [illegible] पा। यथा नेत्रानंदो निशाकरः कथित संबंधः अत्र नेत्र [illegible] वीः कार्य्यसाध्य वसाय लक्षणा। यथा। इह वरदेव [illegible] रिः अत्र वरादेः कार्य्यादि [illegible] नेत्रादौ लक्षणा। लक्षित लक्षणा। [illegible] परंपरा संबंधः। लक्षितस्य शक्यस्य संबंधस्यार्थस्य लक्षणा संबंध इति [illegible]। यथा। रेफपदे। रेफाय स्येति बहुव्रीहे भ्रमरपदे लक्षणा। [illegible] बोधने। संबंध वाच्य वाचक भावः। नय- मेत्यत्र नयनप स्य नेत्रपदे लक्षणा। एकार्थवाचक संबंधः। तत्संबंधो वक्ष्ये। प्र- मसंबंधी वाच्य वाचक भाव भिन्नः। द्वितीयादि संबंधे नानयमः। एवं संबंधत्रयादि विवक्षायामपि लक्षित लक्षणैव। पा

सावतं समाच्छाद्य बहिरायाहिसंदरि । [illegible] शब्दस्य क[illegible] चुंबन जन्य क्षत
[illegible] धरे लक्षणा । शक्यार्था [illegible] तदन्यानु [illegible] संबंधो अजहल्लक्षणा । शक्यार्थ
[illegible] णेतिविग्रहः । स्वनिष्ठ लक्ष्य तावच्छेदक रूपावच्छिन्न विषयता निरूपकत्व स्वा-
न्यशक्यार्थ निष्ठ [illegible] यता निरूपकत्वो भ [illegible] न लक्ष्य विशिष्ट बोध प्रयोजकत्वं । जह
ल्लक्षण [illegible] तीय संबंधः । शक्ति वारणाय प्रथम संबंधः । काके भ्योदधि रक्ष्यतामि
त्यादौ [illegible] बोधः । लक्ष्य तावच्छेदकं दध्यु पघा [illegible] । इदमेवोप
लक्षणं । साक्षात्येन तत्सदृजन्य बोध विषयत्वे सति तत्र [illegible] त्वे पत्वस्यैवोप लक्षण-
त्वात् । लक्ष दर्शन इत्यस्मात् [illegible] णिभावेवालुद् । अनादेशः । यद्नां । भकर्तरीति नपुंसके । ता
त्पर्यानुपपत्तिर्लक्षणा बीजं । तत्रान्वयानुपपत्तिः । गंगा [illegible] ष इत्यादौ तस्य बीजत्वेपि काके

भ्योदधिरस्यतामित्यादौतदसंभवात्। उभयत्र तात्पर्यानुपपत्तेःसत्वात् स्थान भेदेन तदुभय कल्पनेगौरवाच्च। तात्पर्यं तत्प्रतीतीच्छयोच्चरितत्वं। नच्चवाक्यार्थ ज्ञाने हेतुः। नन्वादिकंतु तात्पर्यग्राहकं। नतु शाब्दबो[illegible]। [illegible]त्वावच्छिन्नं प्रति तात्पर्यग्रह जनकत्वेन कारणत्वापेक्षया तात्पर्यग्रहत्वेन [illegible] लाघवात्। लक्षणापिपदएव। नतु वाक्ये। शक्यसंबंधस्यैव लक्षणात्वेन वाक्ये [illegible]त्यभावेन तदभावात्। वाक्ये शक्ति स्वीकारेवाक्यार्थे कार्थबो धकस्यैववक्तृविवक्षापरतंत्रत्वेनपूर्वोत्तरपद समभिव्याहार व्य[illegible]दि धत्त[illegible]नेक शक्ति कल्पनाप्रसंगः। ननुगभीरायांनद्यां घोष इतिवाक्ये लक्षणादृष्टेतिचेन्न। तत्रनदीपदएवलक्षणात्। गभीरपदस्तु [illegible]। भेदेनान्वयः। नचतस्यैकदेशान्वय इति शंक्यं। चैत्रस्यगुरुकुलं धान्येन धनवानित्यादौत[illegible]र्शनात्। यदिशाक्येकदे[illegible]न्वयस्यैवा व्युत्पन्नतांकारे-

णयुक्त इत्यध्याहारेण धान्येन को धनवान्भवत्यर्थ सामान्यतोभयत्रैकदण्डान्वय इति।
तर्हि न पदस्य गंभीर नदी तीरलक्षणा। गंभीर[illegible]त्वसौकर्या। तात्पर्यग्राहक।
इति लक्षणाशब्दः। उपकुम्भमलंकुंभपदस्य तत्समीपवर्तिनि लक्षणा। स्वीय शब्दा
र्थे सामीप्यवत्यन्वयः। पूर्व[illegible]प्राधान्येनान्वयबोधः। अस[illegible]लक्षशब्दस्य तज्जन्येलक्ष
णा। त्रिभुनीत्यत्र त्रिपदस्य त्रिनय प्रणीते लक्षणा। पूर्वपदं तात्पर्यग्राहकं। तत्पुरुषेतु उत्तान
शय इत्यादौ उत्तानपद[illegible]तानावस्थावति लक्षणा। तस्य शयपदार्थे शयन कर्तर्यन्वयः। उत्तर
पदार्थप्राधान्येन बोधः। अन्योराजा राजांतर[illegible]भेदविशिष्टे लक्षणा। पू ॥५१॥
र्वपदार्थप्राधान्यादन्वयः। त्रिलोकीत्यादि समाहारे गौ। लोकप[illegible]शिष्टलोकस
मुदाये लक्षणा। त्रिपदं तात्पर्यग्राहकं। द्व्यंगुलमित्यादि शक्यद्विगौ[illegible]यांगुलिद्व

धनवति लक्षणा। पूर्वपदं तात्पर्यार्थकं। पंचगवधनमित्यादौ अनेकवृद्धाविद्विगोर्धनपदस्यैव पंचसंख्याकगवाभिन्नधनवति लक्षणा। पूर्वपदं तथा। नीलघटमित्यादौ कर्मधारये। नीलपदस्य नीलरूपवति निरूढलक्षणा। तस्याभेदसंबंधेन घटेऽन्वय इति केचित्। नीलपदार्थो भेदसंबंधेन घटपदार्थे प्रकार इत्यपरे। वैय्याकरणखसूचिरित्यादि विशेषणोत्तरपदे उत्तरपदस्य लक्षणेति केचित्। अभेदेऽन्वय इति केचित्। घनश्यामइत्यादौ घनपदस्य तन्निरूपितसादृश्यविशिष्टे निरूढलक्षणा। तस्य श्यामपदार्थेऽभेदेनान्वयः। नरसिंह इत्यादौ सिंहपदस्य तत्सदृशे निरूढलक्षणा। विद्याधनमित्यादावपि नेयं पदं तत्सादृश्यनिरूढलक्षणा। रामशब्द इत्यादौ शब्दपदं तदवांतरभेदज्ञापकवैलक्षण्यविशिष्टे निरूढलक्षणा। तस्य रामपदे अभेदेनान्वयः। शाकपार्थिव इत्यादौ शाकपदस्य तत्प्रिये लक्षणा। रजतमित्यादौ स

षपदस्य सप्तत्वसंख्याविशिष्टे निरूढ लक्षणा। दिक्संख्ये संज्ञायामिति समासः। द्विजार्थइ
त्यादौ न्यधिकरण तत्पुरुषे द्विजपदस्य तदुद्देश्यकत्ववति लक्षणा। अतिमाल इत्यादौ माला-
पदे पंक्ति वाह्ये लक्षणा। पूर्वपदं तात्पर्यग्राहकं। कुंभकार इत्यादावुत्तर पदार्थ प्रधाने कृदंत स-
मासे सर्वत्र शक्तिरेवेति नव्याः। अर्धपिप्पली त्यादावुत्तरपदे तत्संबंधिनि लक्षणा। पूर्वप-
दार्थप्रधान तयान्वयः मास जात इत्यादि प्रथमा तत्पुरुषे जातपदे मासपरिमित काल वृत्तित्व
वति लक्षणा। मासपदं तात्पर्यग्राहकं। कृष्णाश्रित इत्यादौ कृष्णपदस्य तत्संबंधिनि लक्षणा।
संबंधश्चा धाराधेय भावादिः। शंकुला खंड इत्यादौ शंकुलायास्तत्संबंधिनि लक्षणा। सचज
न्य जनक भावः। यूपदार्वित्यादौ यूपादिस्तत्संबंधिनि। सचप्रकृतिविकृति भावःसंबंधः। भूत
बलिरित्यादौ भूतपदस्यापि तथा। एवंचोरभयं अक्षशौंडः राजपुरुष इत्याद्यनित्य व्यधिकर

ण तत्पुरुषेषु प्रधान वाचकभेदे सर्वत्र लक्षणा। राजादिपदेन पुरुषादिपदार्थस्य साक्षादन्व
या भावात्। साक्षादित्यस्य प्रत्ययार्थमद्वारीकृत्येत्यर्थः। निपातातिरिक्त नामार्थयो र्भेदेन सा
क्षादन्वय बोधस्या व्युत्पन्नत्वमिति नियमात्। अन्यथा राजापुरुष इत्यत्रापि भेदेनान्वय-
बोधः स्यात्। घटोनपट इत्यादौ घटपटाभ्यां नत्रः साक्षादेव भेदेना न्वयान्निपातातिरिक्तेति
। नीलो घट इत्यादौ नामार्थयोरभेद संबंधेनान्वयाद्भेदेनेति। पीतांबर इत्यादि बहुव्रीहौतु
सर्वत्र लक्षणैवारामलक्ष्मणाविति त्यादौ तरेतर योगद्वंद्वेतु विभक्त्यर्थद्वित्वप्रकारक बोधान्वयसाहि
त्ये लक्षणा। उभयोः शक्तिरेव। नचैककियान्वयित्वरूपसाहित्यस्य तत्रापिबोधात्तत्र लक्षणे-
तिवाच्यं। क्रियाभेदात्। तथाहि। रामलक्ष्मणौ गच्छत इत्यादौ रामादि पदस्य साहित्य विशि-
ष्टे लक्षणांगीकारे साहित्यस्य व्यासज्यवृत्तितया तदवच्छेदेना व्यासज्यवृत्तेर्गमन [illegible]

स्यान्वयासंभवः। नच नीलघट इत्यादि कर्म धारयस्य द्वंद्वस्य चको भेदः। उभयोरपि लक्षणा भावादिति वाच्यं। अभेदे कर्म धारयः भेदे द्वंद्व इति नियमात्। नचतर्हि नीलघटयोरभेदइत्यादौ कथं द्वंद्व इति वाच्यं। नीलपदस्यनीलत्वे इति लक्षणा। घटपदस्य घटत्वे। अभेदइत्यस्याश्रया भेदइत्यर्थ विवक्षणात्। अहिनकुलमित्यादि समाहार द्वंद्वेतु नकुलपदे अहिनकुल समाहारे लक्षणा। पूर्वपदं तात्पर्यग्राहकं। पितरावित्यादि विरूपैक शेषे जनक दंपत्योर्लक्षणा। घटा इत्यादि सरूपैक शेषेतु घटत्वेनरूपेणानेक घटोपस्थिति संभवान्न लक्षणा। अघट इत्यादि नञ् तत्पुरुषे घटपदस्य तत्संबंधिनि लक्षणा। तस्याभेदेन नञर्थो भावे भेदे वान्वयः। तथाचयत्र पूर्वपदार्थस्य प्राधान्यं तत्रोत्तरपदार्थे लक्षणा यथोपकुंभं। यत्रोत्तरपदार्थस्य प्राधान्यं तत्रपूर्वपदे लक्षणा। यथा राजपुरुषः। यत्रोभय पदार्थ प्रधान

तान तत्र लक्षणा। यथा स्नानानुलिप्तः। यत्रान्य पदार्थस्य प्राधान्य तत्र समासस्यैव लक्षणा। यथापीतांबरः। यत्रोत्तरपदार्थप्राधान्येपि प्रत्ययार्थमद्वारी कृत्या भेद बोधस्तत्रपूर्व पदेन लक्षणा। यथा नीलोत्पलं। अर्शआद्यजंतानां निरूढ लक्षणा नद्वति। नतुसमास प्रयुक्त लक्षणा। यथाराजपुरुषः। शुक्लागोः समासस्तद्धित पद घटित त्वे सति पदत्वं। अव्ययी भावान्य तमत्वंवा। अव्ययी भावतत्पुरुषः कर्म धारयो। द्वंद्वबहुव्रीहे द्वंद्व श्वेतिसमासः षाड्गुण्यः। समास प्रयुक्त लक्षणा शून्या व्यय पदकत्वे सति विशेषण विशेष्य भावापन्न विभिन्न धर्मि बोधक नामत्व अव्ययी भावस्य। द्वंद्व वारणाय स्वर्लोक इति कर्म धारय वारणायच विशेषण विशेष्य भावापन्नेति विभिन्नेतिच धर्मि विशेषणं। राजपुरुष इत्यादि तत्पुरुष वारणाया पाप इत्यादि मत्वर्थीय पदवारणाय वाव्यय पदकत्वे सतीति। स्वर्वास इति

तत्पुरुषवारणाय समासप्रयुक्त लक्षण।शून्येत्य व्यय विशेषणं। तत्पुरुषेतु सर्वत्रसमास प्रयुक्त लक्षणा स्वीकारात्। उपकुंभं अक्षपरी त्या व्ययी भावेतु कुंभादिसंबंधिनि समासप्र युक्त नामपद लक्षणा स्वीकारा द्विशेषण विशेष्य भावेन कुंभ संबं ध्य भिन्नं सामीप्यं अक्षसं बं ध्य भिन्नं विपरीतं वृत्तमित्य न्वय बो धा लक्षण संगतिः। इदमन्य पदार्थं प्र धानाति रिक्ता- व्ययी भावस्य लक्षणं। समासप्रयुक्त लक्षणा शून्य विशेष्य भावा पन्न पूर्वोत्तरान्यतर नाम पद कत्वे सति लु प्त द्वितीयादिविभक्तिक पूर्वोत्तरान्यतर नामपद कत्वे सति समासत्वं तत्पु रुषत्वं। राजपुरुष इत्यत्र विशेष्य भा[illegible]पुरुषपदस्य प्राधान्येन लक्षणा भावात् पूर्व पदोत्तर षष्ठ्याःलोपाच्च अर्धपिप्पलीत्यादौ विशेष्य भावा पन्नस्या र्धस्य प्राधान्या दर्धप दे लक्षणाया अभावा दुत्तरपद षष्ठी विभक्ते र्लोपाच्च लक्षण समन्वयः। इदमन्य पदार्थं प्र धा

॥५४॥

नातिरिक्त तत्पुरुष लक्षणं। कर्म धारय वारणाय विशेष्यं। [illegible] सत्यंतं। तत्रोत्तर पदे समाहारे लक्षणाया: सत्वात्। समास प्रयुक्त लक्षणा शून्य पदकत्वेसति तुल्यार्थकानेक नाम [illegible] कर्म धारयत्वं। नीलोत्पल मित्यादौ नीलपदे नील रूपाश्रये निरू. लक्षणाया: [illegible] युक्त त्वा भावा [illegible] त्पल पदयोस्तु ल्यार्थत्वा भावाच्च लक्षणसंग तिः। घन: श्याम: विद्या धनमित्यादावे गुण निधि रित्यादिबहुनादे पदस्य तत्सादृश्या- श्रये निरूढ लक्षणाया: सत्वान्ना व्याप्तिः। पंचगवं पंचफली त्यादि द्विगु वारणाय सत्यंतं। द्वंद्व वार णाय विशेष्यं। सं [illegible] विषयान्यत्वेसति संख्यावाचक पूर्वपदकत्वेसति तुल्यार्थक पदद्वय घटि त समासत्वं द्विगुत्वं। पंचानांगवां समाहार: पंचगव मित्यादौ पंचगोपदयोस्तुल्यार्थत्वाल्लक्ष- णसंगतिः। गोपदस्य गोसमाहारे लक्षणा। तदेक देश गोषु [illegible] र्थस्या भेदे नान्वयः।व्यु

सत्तिवैचित्र्यात्। पंचकव्या इत्यादिकर्म धारयवारणाय प्रथमदलं। नीलोत्पलमित्यादि वारणा
यद्वितीयं। पंचभिः सहेति वाक्यवारणायोद्देश्यं। समासप्रयुक्तलक्षणावत्सदकत्वे सतिस
मास बहिर्भूत पदार्थ विशेष्यक बोध जनकानेक नामघटितसमासत्वं बहुव्रीहित्वं। चित्रगु
रित्यादौ चित्रपदेगोपदे वा चित्र गोस्वामिनि लक्षणायाः सत्वात्समास बहिर्भूत यत्पदार्थ वि-
शेष्यक बोध जनक पदद्वय घटितत्वाच्च लक्षणसंगतिः। हरिः संदर इति वाक्य वारणाय सत्यं
तं। राजपुरुष इत्यादि तत्पुरुष वारणाय विशेष्यं। नच पंचषा इत्यादाव व्याप्तिः। तत्राप्यन्य
तरत्वे लक्षणाया आवश्यकत्वात्। अव्यवहित पूर्वापरीभाव त्वेसति परस्परा न्वित विभि
न्न धर्मावच्छिन्न धर्मि बो धकानेक नामघटितत्वं द्वंद्वत्वं। रामलक्ष्मणौपश्यतीत्यादौ लक्ष-
ण संगतिः। नीलघट इत्यादि कर्म धारय वारणाय परस्परा न्विते ति धर्मि विशेषणं। रामो

लक्षणश्चेति वाक्य वारणाय सत्यंतं। तत्रसुबि भक्त्या व्यवधानात्। नीलघट योरभेदः। अप्येकदंत हेरंब लंबोदर गजानना। इत्यादौ द्वंद्वस्य साधुत्वाय विभिन्न धर्मावच्छिन्नेति। तथाच समस्यमान पदार्थ भेदे द्वंद्वः। किंतुसमस्यमान पदार्थ तावच्छेदक भेदे इति फलितं। नच नीलोत्पल मित्यादि कर्म धारयस्थलेपि द्वंद्वएवस्यात्। तत्रपदार्थ तावच्छेदक भेदेपि यतदाश्रये सर्वत्र प्राधान्य विवक्षा तत्रैवद्वंद्व इति नियमात्। यदिच तत्रापि तथा विवक्षात हिष्टमेव। अव्ययी भावादि षट्कान्यत्वे सति समासत्वं केवलसमासत्वं। यथापूर्वभूतः भूत पूर्वः। पूर्वपदस्यपूर्वकाल वृत्ति निलक्षणा। तस्यभूतपदार्थेऽभेदानान्वयः। चंद्र इवमुखमि त्यादौ चंद्रपदस्य चंद्र निरूपिते लक्षणा। इव शब्दार्थ सादृश्ये अभेदे नान्वयः। तस्यसुखेतुभे दसंबंधेनान्वयः। विग्रह वाक्यादा दावो धःसमासात्तद्विपरीत बो धः। यथाराज दत्त धन

इत्यत्र राज्ञा दत्तं धनं यस्मैस इति विग्रहवाक्याद्राजकर्तृक यत्संप्रदानक दानकर्म धनमितिबो धः। समासेतुराजकर्तृक दान कर्मीभूत धन संबंधीय इति बो धः। संबंधश्च स्वकर्मक दानसंप्र दानत्वं। तद्गुणसंविज्ञान [illegible] ब्रीहिरिति द्विवि धो बहुव्रीहिः। तस्य [illegible] मान पदार्थस्य गुणस्या [illegible] र्थस्यच सम्यक् विशेष्य वि धेया प्रकृत क्रि या न्वयित्वेन ज्ञानं यस्मादिति विग्रहः य था भूवादयो धातव इत्यत्रे ध प्रभृतीनाम समभि नपदा र्थानां समस्य मान भूपदार्थस्य च क्रियावाचक तया नि मंत्रि तत्वेन धातुत्व प्रकारक बो धः। लक्ष्यक संबं धस्येव लक्ष्यता वच्छेद [illegible] स्वरूपेणैव भुवादे र्बो धा दजहत्स्वार्थलक्ष णा। स्व [illegible] द्वाक्यार्थ मजहती अजहत्स्वार्था। [illegible] दित्वात्समासः। अतद्गुण संविज्ञान बहुव्रीहिस्तु। सम [illegible] मान पदार्था भाव विशिष्टा समस्यमानपदार्थस्य प्र [illegible] ताके

यान्वा येत्ये- ज्ञानं। यथाचित्रगुमानयेत्यादौ गोस्वामिन एवानयनक्रियान्वयित्वेनबोधः। अत्र जहत्स्वार्थालक्षणा। इतिसमासवादः। ननुव्यंजनायास्तृतीयवृत्तेःसत्वात्त्रैविध्यं इतिद्वैविध्यं। तथाहि। शाब्दबोधानंतरंवाक्यार्थोपस्कारार्थमर्थांतरबोधकोयोव्यापारः सव्यंजना। साच लक्षणामूलका अभिधामूलकेतिद्वेधा। गंगायांघोष इत्यत्र स्वायत्तेशब्दप्रयोगे किमित्यवाच्ये प्रयुंजामहे इतिन्यायेनलक्षणिकप्रयोगेप्रयोजनंवक्तव्यं। तच्च तीरगतशैत्यपावनत्वादिकं। तत्प्रतीतिश्च व्यंजनयैवेति लक्षणा मूलका। अभिधा-लक्षणा-शक्ति-मूलक अर्थशक्ति-मूलकभेदाद्विविधा। सामोदसुमनोजातजुष्टोजनिमाधव इत्यादौ प्रथमं शक्त्यावसंतबोधात्पश्चात्कृष्णबोधे व्यंजनैव। नाभिधा। प्रथमार्थएवकुठितत्वात्। नापिलक्षणा। वाच्यार्थानुपपत्त्याभावात्। प्रातश्चैत्रकांतकोदोषःशांतोऽसावपि[illegible]

णमित्यादौ वक्तृकोपः प्रतीयते । साचार्थशक्तिमूलयाव्यंजनयैवेति चेन्नैवं । लक्षणायास्तात्पर्यानुपपत्तिबीजकत्वेन शैत्यपावनत्वादिरूपे वक्तृतात्पर्यशैत्यपावनत्वादिप्रयोजनप्रतीतिरपि लक्षणयैवेति लाघवात् । सामोदेत्यादौ शक्त्यैव निर्वाहात् । अन्यथा शक्तिग्राहकशास्त्रादिवैय्यर्थ्यात् । नचतथापिवसंतकृष्णयोरूपमाप्रतीतिर्व्यंजनया । तत्रसमयाभावाच्च शक्तिः । बीजाभावान्न लक्षणेति वाच्यं । तत्रापि तात्पर्यानुपपत्तेःसत्त्वादजहल्लक्षणयैव निर्वाहात् । वाक्यार्थज्ञानानंतरं सादृश्यसंभावनेति केचित् । अयं कविः सादृश्यविवक्षावान् विलक्षणश्लिष्टवाक्यप्रयोक्तृत्वादित्यनुमानेननिर्वाह इत्यपरे । प्रातर्भेदित्यादौतु इयंमयि कोपवती विलक्षणवाक्यप्रयोक्तृत्वादेतदनुमानेननिर्वाहात् । यद्यनियतार्थप्रतीतिरनुमानपरिपाटीविरुद्धेत्युच्यते तर्हि संभावनायामंतर्भावः । उत्कटैकतरकोटि

कःसंशयः संभावना। इतिव्यंजनावादः। आकांक्षेति। आकांक्षादि ज्ञानमित्यर्थः। अन्यथा-
कांक्षादि भ्रमाच्छाब्दबोधो न स्यात्। पदस्येति। यत्रयत्पदाभावेसत्यन्वयो नभवतितत्र तत्पदवत्व
माकांक्षा। यथागामानयेत्यादौ गोपदाभावेऽन्वयो नभवतीत्यानयपदे गोपदसमभि व्याहारः।
द्वारमित्यादौ प्रकरणादिनामपि धेहित्य ध्याहारेणान्वय बोधः। अभेदसंसर्गक शाब्द बो
धे विशेष्य विशेषण वाचक पदयोः समान विभक्तिकत्वं तंत्रं। नच नील घट इत्यादि समास
स्थले व्यभिचारः। स्फो धातु प्रतिपादे क योरिति नीलपदोत्तर स्फो लोपेऽकारः, लोपे पिप्र
त्यय लक्षण मित्यनुशासना त्तत्र तादृश ज्ञानसत्वात्। भेदसंसर्गक शाब्द बो धेत्व समानवि
भक्तिकत्वंतयोस्तंत्रं। यथाराज्ञःपुरुष इति। भेदाभेदान्यतरसंबंधेन विशेष्य वृत्तित्वं विशेषण
त्वं। प्राधान्येन क्रियान्वयित्वं विशेष्यत्वं। अर्थाबाध इति। बाधनिश्चया भावो योग्यतेत्य

र्थः। उच्चारणमिति। अखंडेन पदोच्चारणजन्यपदार्थोपस्थितिरित्यर्थः। ईश्वरोक्तत्वादिति वेदः पौरुषेयः वाक्यसमूहत्वाद्भारतादिवत्। तेऽपानात्त्र्योवे [illegible] तेर्वेदस्यानित्यत्व [illegible] र्थः। शब्दस्त्रिविधः। विध्यभिधायकोऽर्थवादो मंत्रश्चेति। कृतिसाध्येष्टसाधनत्वं विधिः। एतदर्थकलिङ्लोटतव्यादिप्रत्ययघटितः शब्दः प्रथमः। ज्योतिष्टोमेन स्वर्गकामोयजेतेत्यादि काम्यस्थले अहरहः संध्यामुपासीतेत्यादि नित्यस्थलेचचिकीर्षाद्वारा कृतिसाध्येष्टसाधनता ज्ञानं प्रवृत्तिं प्रतिकारणं। विधिस्त्रिधा। अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति। तत्रात्यंतमप्राप्तौ बाध्यः। यथास्वर्गकामोयजेत। अत्रयजनस्यानन्यलभ्यत्वात्। यत्रोभयोः प्राप्तावेको नियम्यते तत्रनियमविधिः। यथाव्रीहीन्वहंतीति। अत्रव्रीहिषु लब्धविद्वलनमुसलावहनयोः प्राप्तौ मुसलावहनमेवनियम्यते। सर्वत्रप्राप्तस्य क्वचिद्विधिःपरिसंख्यावि

धिः। यथा। पंचपंचनखा भक्ष्या इति। अत्रसर्वेषां पंच-[illegible] भक्ष्या इति। शशकः शल्लकी गो धासडी [illegible]र्मभ्य पंचमः। अर्थवादस्त्रिधा। [illegible] भूतार्थवाद श्चेति। [illegible] आदित्यो [illegible]। अजमानः [illegible]। [illegible] णः। प्रमाणांतरेण निर्णीतार्थ [illegible] वादः। यथा अग्निर्हिमस्यभेषजं। अयंप्रत्यक्षसिद्धोर्थः। [illegible] तद्गुणज्ञापको भूतार्थवादः। यथा जरायामप्ययंशूरः। देवदत्तो रात्रौ भुङ्क्ते दिवा अभुंजानत्वेसति पीनत्वादित्याद्यनुमानेन रात्रिभोजनादिसिद्धेरर्थापत्तिर्न [illegible] णं। ऐतिह्यस्य शब्देंतर्भावः। तथाच प्रत्य[illegible]। श्रुतार्थापत्ति [illegible] नि। ७। संशय लक्षण माह। एकस्मिन्निति। एक धर्मि[illegible] रुद्धानेक धर्म निष्ठप्रकारता ज्ञात्यनुभवत्वं संशयस्य लक्षणं। भावद्वय [illegible] संशया-

प्रसिद्धेः स्थाणुत्व तद्भाव पुरुषत्व तद्भाव कोटिक एव। घटपटाभाव घटा दित्यादि समूहा
लंबन ज्ञानेति व्याप्ति वारणाय [illegible] ते। घटो द्रव्य मित्यादावति व्याप्ति वारणाय विरुत्थेति। घ
टत्व विरुत्थ पटत्वा भाववानिति वारणाया नेकेति। संशयोद्विविधः। उत्कटैक कोटिकः स-
मानेक कोटिक श्चेति। आद्यः संभावने त्युच्यते। मिथ्याज्ञान मिति। तद भाववन्निष्ठ विशे
[illegible] नि रूपेत त्वेन [illegible] नुभव इत्यर्थः। तत्पदमेक धर्मपरं। तेन न संशये
ति व्याप्तिः। निश्चयत्वं वादेयं। तेन ने [illegible] व्याप्तिः। व्याप्यारोपेणेति। व्यापका
भावरूप व्याप्यारोपेण व्याप्याभावरूप व्यापकारोप इत्यर्थः। यद्यपि तर्कस्य मानस वि-
पर्ययरूपत्वाद्विपर्ययेंतर्भावः। तथा [illegible] जननीयायां प्रतिबंधक विघट
नद्वारोपयोगित्वेन वैलक्षण्यात्पृथक्करणं। तर्के साहचर्य नियमः कार्यकारण भावोवा

आवश्यकः। ननुस्मृत्या ज्ञानस्यापि चतुर्थस्य सत्वात्कथम यथार्थानुभवस्य त्रैविध्य मिति चेन्न। तस्यापि मानस विपर्ययरूपत्वात्। प्रमाजन्येति। प्रमायाः प्रत्यक्षा।देरूपेण-चातुर्विध्या त्प्रमाजन्यस्मृतिरापे तथेत्यर्थः। अप्रमाजन्येत्यत्राप्येवं। सुखं लक्षयति।सर्वेषामिति। अनुकूलत्व प्रकारक ज्ञान विषयत्व मित्यर्थः। अनुकूलत्वंचेष्टत्वं। विदज्ञाने इत्यस्मात्कर्मण्य नीयर प्रत्ययः। ननु घटोनुकूल इति ज्ञानेति व्याप्तिरितिचेन्न। ज्ञानेछा द्वेष दुःखेषु दुःखहेतौच वेदनेत्यनुशासनात् वेदानाया इच्छार्थकत्वेन छभयत्वयस्य विषयत्वरूप संबं धार्थकत्वेन इतरे छान धीनत्वरूपानुकूलत्वस्ये छायामन्वे नचइतरे छा नधीनेछा विषयत्वमिति निष्कर्षात्।फलेछयाउपायेछा भवतीतिफलेछायाउपा छा नधीनत्वं। प्रतिकूलदेवनीय मिति। दुःखद्वेषानधीनद्वेषविषयत्वमित्यर्थः। फलद्वेषादु

पायद्वेष इति लक्षणसंगतिः। अनुभवजन्येति। जायतेच पुनः पुनः स्मरणादुत्तरः संस्कार इत्यनुभवस्यदं ज्ञानपरमिति बोध्यं। सामान्यं लक्षयति। नित्यमिति। एकपदस्वरूपनिरूपणार्थं। नित्यत्वेसत्यनेक समवेतत्वं लक्षणं। संयोगवारणायनित्यत्वं। आकाशादिवारणाया यानेकेति। उपाधिवारणायसमवेतत्वं। स्वाश्रयान्योन्या भाववदवृत्तिंचित्समवेतत्वमनेकसमवेतत्वं। तेनरूपत्वादौना व्याप्तिविरोधेनाति व्याप्तिः अतएव स्वतो व्यावृत्ताश्च। व्यावर्तका इति। परमाणूनां परस्परभेदकत्वमित्यर्थः श्च। प्रागभाव इति। सच उत्पत्तेरिति जनकः। भावेष्यतीति व्यवहारहेतुः। ध्वंसस्तु प्रतियोगिजन्यः। स्वप्रतियोगिसमवायि कारणवृत्तिः। संसर्गावच्छेदेति। तात्पर्यादिति संबंधावच्छेदेत्यर्थः। अन्योन्याभाववारणायेतत्। ध्वंसप्रागभावयोरतिव्याप्तिवारणयत्वैकालिके ॥६०॥

ति । अत्यंताभावः प्रामाणिकप्रतियोगिकः । नत्व प्रामाणिकप्रतियोगिकः अभाव ज्ञानं प्रति प्रतियोगि ज्ञानस्य कारणत्वेन प्रतियोगिसत्तापेक्षणात् । शशशृंगं नास्तीत्यादौ शृंगे शशीय त्व भावः । नन्वत्यंताभावस्य नित्यत्वे भूतले घटानयनेपि घटाभावप्रतीतिः स्यादितिचेन्न । भूतद्घट संयोग प्राग भाव ध्वंस योरत्यंता भाव प्रतीति नियमकत्वात् । घटः पटो नभवती-ति । तादात्म्य संबंधावछिन्न पटाभावः घटे । अयमेव भेद इत्युच्यते । एक प्रतियोगिक यो-र्ध्वंस प्राग भावयोरि वैक प्रतियोगिक योरत्यंताभावा न्योन्या भावयो र्भेदः । अनेकत्वस्य बहुत्व संख्या रूपत्वे व्याप्तिः । एकत्वसंख्या वछिन्नत्वे द्रव्यत्वादावव्याप्तिः । अपेक्षा बुद्धि-विशेषविषयत्व रूपैकत्व वछिन्नत्वे तादृशैकत्वस्य केवलान्वयित्वेनासंभव इति भावः । संस र्ग भेदात् । केवलात्यंता भावाद्विशिष्टात्यंताभावो भिन्नः । केवल देवदत्तसद्भावे पि दंडाभावा

द्वंद्व्य भाव इति प्रतीतेः। एकसत्वेपि द्वयंनास्ती ति प्रती त्यानुरोधेन द्वित्वावच्छि न्नाभावोभि भः। संयो गेन घटसत्वेपि समवायेन घटो नास्ती ति प्रतीतेः। तत्र द्वटवति घटसामान्याभाव प्रतीति दर्शनाद्विशेष सामान्याभावयोर्भेदः। अन्यथायत्किंचिद्वटवात घटो नास्तीति प्रतीत्यापत्तिः। स्वरूप प्रतियोगिक भेदाद्विशिष्ट प्रतियोगिक भेदोतिरिक्तः। शुद्ध घटे नील घटो नेति प्रतीतेः। अयं घटोपि घटपटोभयं नेति प्रतीतेरेक प्रतियोगिक भेदा द्वित्वावछिन्न प्रतियोगिक भेदोतिरिक्तः। तद्वटे अयं घटो घट सामान्यं नभवतीति प्रतीतेस्तद्वट भेदाद्व सामान्यभेदोतिरिक्तः। व्यधिकरण धर्मावच्छिन्न प्रतियोगिता को घटत्वेन पटाभावो नांगीक्रियते। अभाव ज्ञानस्य विशिष्ट वैशिष्ट्यावगाहित्वेन घटत्वेन पटो नास्तीति प्रतीतेर्घटत्वावच्छिन्न पटनिरूपित प्रतियोगितावगाहित्वा संभवात्। अतिरिक्तत्वे व्यधिकरण धर्मावच्छि नाभावः केवलान्वयी। ॥६३॥

अभावा भावोभाव एवान्यत्रातिरिक्तः। अन्यथानवस्थिते रितिप्राञ्चः। अतिरिक्त एव। तृतीयाभावस्य प्रथमा भावरूपत्वा भानवस्थेति नवीनाः। अन्योन्या भावा भावः प्रतियोगितावच्छेदकरूपः। ध्वंसाभाव भावः प्रागभाव ध्वंसश्च प्रतियोगिस्वरूपः। अत्यंताभावस्य प्रतियोगिनासाकं विरोधः। अन्योन्याभावस्य प्रतियोगितावच्छेदकेन साकविरोधः। विरोधः सहानवस्थानं। अत्रात्यंता भावोयदि नित्यस्तर्हि प्रतियोग्य भावयोः सामानाधिकरण्यं। यद्यनित्यस्तर्हि प्रागभावेवा ध्वंसेवा छेदकसंसर्गावच्छेन प्रतियोगितासंबंधेनवृत्तित्वं। नच प्रतियोगिसत्तादशायां तदंता भावस्तत्प्रतियोग्यधिकरणेत्यंताभाव आगच्छतीति वाच्यं। क्रियाभावात्। अभावस्यभावस्याधिकरणरूपत्वं। इतिपदार्थनिरूपणं। अथसाधर्म्यनिरूप्यते। गुणकर्मणी द्रव्य एव। योग्यविभु। शेषगुणानां योगपद्यनिषेधः बुद्धिसुखदुः

रवे छाऽऽति शब्दाःयोग्याः। एते क्षणिकाः। बुत्धिरूपदुःखेछा[illegible]भावनाःसवि
षयकाः। घट इतिव्यवहारविषयोय मित्यनुभवाछब्दोपिसविषयक इतिकेचित्। द्वेष ध
र्माधर्म भावनास्तु नक्षणिकाः नापियोग्याः। अतींद्रियत्वेन कार्यानु[illegible]एव। उत्पत्तिक्ष
णादारभ्य सूक्ष्मरूपेण स्थायिनःकार्यानंतरंनश्यंतीति सांप्रदायिकाः। [illegible]व्यास्तु अपूर्वमु
त्पाद्य नश्यंति कार्यानंतर मपूर्वस्यनाशिः। अपूर्वस्तु स्वरूप संबंध विशेष इति। सामान्यं
द्रव्य गुण कर्मसु विशेषाः नित्यद्रव्येषु। समवायः प्रतियोगितानु योगि तान्यतरसंबधे
न द्रव्य गुण कर्म सामान्य विशेषेषु। अभावः स्वरूप संबधेन सप्तपदार्थेषु। अवयवाव
यविभावो द्रव्यस्येव। समवायि कारणत्वंच। अ[illegible]यिकारणत्वं गुणकर्मणोरेव।
विमित्त कारणत्वं सर्वेषां। [illegible]त्परिमाणं [illegible]पे कारणं। [illegible]व्यपरिमाण पृथ

क्त्व संयोग विभाग परत्वा परत्व गुरुत्व नैमित्तिक द्रवत्व वेग स्थित स्थापकाः सामा
न्यगुणाः। रूप रसगंधस्पर्श सांसिध्धिक द्रवत्व स्नेह शब्द बुध्धि सुख दुःखे इच्छा द्वेष प्र
यत्न धर्मा धर्म भावनाः विशेषगुणाः। रूपरसगंध स्पर्श संख्या परिमाण पृथक्त्व-
संयोग विभाग परत्वा परत्व गुरुत्व नैमित्तिक द्रवत्व वेग स्थितस्थापकाः पृथिव्यां।
गंध नैमित्तिक द्रवत्व स्थितिस्थापक वर्जाः सांसिध्धिक द्रवत्वस्नेह सहिताएते गु
णाजले। रसगंध स्थित स्थापक वर्जाः पृथिवी गुणास्तेजसि। स्पर्श संख्या परिमा
ण पृथक्त्व संयोग विभाग परत्वापरत्व वेगाः वायो। संख्यापरिमाण पृथक्त्व संयो
ग विभाग परत्वा परत्व शब्दाः आकाशे। संख्यापरिमाण पृथक्त्व संयोग विभागप
रत्वापरत्वा निकाल दिशोः। संख्या परिमाण पृथक्त्व संयोग विभागपरत्वापरत्व बु

त्थिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाआत्मनि संख्यापरिमाणपृथक्त्व-
संयोगविभागबुद्धिइच्छाप्रयत्नाः परमात्मनि संख्यापरिमाणपृथक्त्वसंयोगविभा-
गपरत्वापरत्ववेगाः मनसि। पृथिव्यप्तेजोवायुमनःसुकर्मे। पृथिवी जलतेजःसुरूपं
। पृथिवीजलयोःरसः। पृथिव्यांगंधः। पृथिव्यप्तेजोवायुषु स्पर्शः। शुक्ले पृथिवीजल
लयोः। द्रवत्वंपृथिवी जलतेजःसु। स्नेहः जले। शब्दः आकाशे। बुद्धिसुखदुःखेच्छा
प्रयत्नधर्माधर्माः आत्मनि। संस्कारः पृथिव्यप्तेजोवायुमनआत्मसु। संख्यापरि-
माणपृथक्त्वसंयोगविभागपरत्वापरत्वानिनवसुद्रव्येषु। इतिसाधर्म्यनिरूपणं ॥ ॥६३॥
अथकथादोषाः। अनेकवत्कृकः। पूर्वोत्तरपक्षवाक्यसंदर्भःकथा। साद्विविधा।
वादोजल्पोवितंडाचेति। प्रमाणफलतत्वबुभुत्सूनांकथावादः। परपक्षनिराकरणस्व

पक्षसाधनवती [illegible]तु कथाजल्पः। स्वपक्षस्थापनहीना [illegible]तु कथा वितंडा। तदो
षास्त्रयः छलं जातिर्निग्रहस्थानमिति। अभिप्रायांतरे- प्रयुक्तस्यार्थांतरं प्रकल्प्य दूषणं-
छलं। यथा केदारं सेवते मैत्र इत्युक्ते विष्णुपरतयाभिप्रेतस्य केशव शब्दस्य केउदके शवंसे
वत इत्यर्थांतरं प्र[illegible]कल्प्य दूषणं। स्वपक्षासाधकं परपक्षासाधक[illegible]। साधकंउत्तरंजातिः। सा
चोत्कर्षसमा अपकर्षसमासंशयसमा अहेतुसमाअर्थापत्तिसमा अविशेषसमाउपपत्ति
समा[illegible]नित्यसमा अनित्यसमासाधर्म्यसमा वैधर्म्यसमा वर्ण्यसमा अवर्ण्यसमा विकल्पस
मा पक्षसमा [illegible]धकरण्यसमाअहेतुसमा[illegible]करण्यसमा [illegible]संगसमाप्रतिदृष्टांतसमा
अनुत्पत्तिसमा [illegible]णसमाउपलब्धिसमानुपलब्धिसमाकार्यसमेति चतुर्विंशतिधा। तत्र प
रोक्तसाधनादेव तद्व्यापकधर्मस्यपक्षेआपा[illegible]नमुत्कर्षसमा। यथाशब्दः अनित्यः कार्य-

त्वाद्घटवदित्युक्ते यदि कार्यत्वहेतुना शब्दो अनित्यः स्यात्तर्हि तेनैव हेतुना घटवत्सावयवः- स्यात् ॥ १॥ परोक्त दृष्टांतसाधर्म्येणपक्षेपराभिमत धर्मांतरस्याभावसाधनमपकर्षसमा। य था। यदि कार्यत्वेनशब्दो घटवदन्त्यः स्यात्तर्हि तेनैवहेतुना शब्दो घटवदश्रावणः स्यात् ॥ २॥ साधारण धर्मं प्रदर्श्यसंशयोद्भावनंसंशयसमा। यथा। शब्दस्यानित्यघटेनसहकार्य त्व रूपसाधर्म्यं यथास्ति तथाशब्दत्वेन नित्येनसहश्रावणत्व रूपसाधर्म्यमस्तीत्युभयसा धर्म्य दर्शनात्संशयः स्यात्। एकपरिशेषे नियामकाभावात्। ३। कालत्रयेपि हेतुत्वासंभवेना हेतुत्वकथनं हेतुसमा। कार्यत्व रूपहेतुरनित्यत्व रूपसाध्यात्पूर्वकालवृत्तिर्यदि तदासा- ध्यस्य तदानीमभावात्तस्य नसाधकत्वं। पश्चात्कालवृत्तिश्चेत्पूर्वकालेसाधना भावात्तस्य न साध्यत्वं। उभयमेककालवृत्ति चेत्किं कस्य साध्यं किंकस्य साधनमितिविनिगमना विरहात्

॥४॥ अर्थापत्तिपुरस्कारेणासाध्याभावाद्अनर्थापत्तिसमा। यदि शब्दस्यानित्यसाधर्म्याद् नित्यत्वमर्थापत्त्यासिध्यतितर्हि नित्यसाधर्म्यान्नित्यत्वमपिसिध्येत्। एकतरावधारणेनियामकाभावात्॥५॥ सर्वानित्यदोषप्रसंगोद्भावनमविशेषसमा। कार्यत्वसाधर्म्येणशब्दस्यानित्यत्वंचेत्प्रमेयत्वसाधर्म्येणसर्वस्याप्यनित्यत्वंस्यात्। मदुक्तसाधर्म्येणतत्सिद्धिःनतुत्वदुक्तसाधर्म्येणेत्यत्रनियामकं॥६॥ उभयपक्षसाधर्म्येणसाधनोपपत्तिरूपपत्तिसमा। यद्यनित्यत्वसाधनंकार्यत्वमुपपद्यतइतिशब्दस्यानित्यत्वंतदानित्यत्वसाधनमपिकिंचिदुपपद्यतइतिनित्यत्वंकिंनस्यात्॥७॥ धर्मस्यनित्यत्वानित्यत्वविकल्पाद्धर्मिणःनित्यत्वसाधनंनित्यसमा। शब्दस्यभवद्भिर्यदनित्यत्वमुच्यतेतच्चित्वमनित्यंवा। नित्यंचेत्तदाशब्दबुद्धेरेवसाध्यधर्मस्यनित्यत्वाच्छब्दस्यापिनित्यत्वमागतं। यद्यनित्यंतदाशब्देकदाचिदनित्यत्वाभावोस्ती

नित्य एव शब्द इत्युभ[illegible]पि वा[illegible]नित्वं ॥८॥ अनित्य दृष्टांत साधर्म्यात्सर्वानित्यत्व प्रसंगो[illegible]वन मानित्यसमा। यदि नित्यत्वेन[illegible]दृष्यादनित्यः शब्द इ[illegible]च्यते तदा येनकेन चित्धर्मेण सर्वस्यापि तत्साद्दृश्यादनित्यत्वं स्या[illegible] ॥९॥ साधर्म्येण[illegible]पना हेतु दूषक मुत्तरं साधर्म्यसमा। यथा। आत्मासंक्रिय: क्रियाहेतुगुणवत्वात्लोष्टवत्। अत्र क्रिया हेतुगुणश्च क्रिया जनक वायु[illegible]संयोगादिदेव। अत्रोत्तरं। यदि सक्रि[illegible]सा[illegible]क्रिय: आत्मातर्हि विभुत्वरूपान्निष्क्रिय साधर्म्यान्निष्क्रिय एवकिं नस्यात्। विनिगमकाभावात् ॥१०॥ वैधर्म्येणस्थापना हेतु दूषकमुत्तरंवैधर्म्यसमा। यदि क्रियावतो लोष्टस्य धर्म्यात्क्रियावत्त्वात्तर्हि विभुत्वरूपाद्वै धर्म्यान्निष्क्रिय एव किं नस्यात्। तत्सा धर्म्यात्क्रियावता भवितव्यं तद्वै धर्म्यान्निष्क्रियेण नभवितव्यमित्यत्र नियामका भावात् ॥११॥ स्थापनायां[illegible] दृष्टांत धर्म[illegible] पक्षेसाधनं वर्ण्यसमा॥

व्या. ॥६

क्रियाजनकनोदनाद्यसंयोगवत्त्वं लोष्टादेः क्रियावत्त्वं भवतु। आत्मनस्तु क्रियावत्त्वे क्रियाजनकनोदनाद्यसंयोगवत्त्वमपि स्यात् ॥१२॥ साध्यहेतुरूपयोर्दृष्टान्तेऽपि पक्षे तुल्यता साधनमवर्ण्यसमा। लोष्टादिगतनोदनादिसंयोगजन्यक्रियाजनकगुणवत्त्वं साध्यत्वेनासत्यं। यथा असिद्धेन क्रियाहेतुगुणेनात्मनि क्रियावत्त्वं साध्यते तथा तादृशक्रियावत्त्वेन क्रियाजनकगुणवत्त्वमपि किमिति नसाध्यते। नियामकाभावात् ॥१३॥ दृष्टांतविकल्पं प्रदर्श्य दार्ष्टांतिकविकल्पकथनं विकल्पसमा। क्रियाहेतुगुणयुक्तं किंचिद्द्रु। यथा लोष्टादि। तादृशगुणयुक्तं किंचिद्द्रु स्तु स्यात्। यथावायुः। पूर्वं क्रियाहेतुगुणयुक्तं किंचिद्द्रु स्तु क्रियावत्स्यात्। यथा लोष्टः। तादृशं किंचिन्नि क्रियं स्यात्। यथात्मा। पूर्वविकल्पो भवति अयंतु नभवतीत्यत्र नियामकाभावात् ॥१४॥ दृष्टांतस्यपक्षतुल्यता कथनं पक्षसमा। यथा लोष्टस्तथात्मेति त्वयोच्यते चेत्तदा यथात्मा तथा लोष्ट इत्यप्यागतं। यद्यात्मनि क्रियावत्त्वं साध्यते तर्हि लोष्टेऽपि त-

साधनीयं। नेति चेत्। यथा लोष्ठस्तथात्मेति नवाच्यं। लोष्ठसदृश आत्मा आत्मसदृशो लोष्ठ इत्यत्र नियामकाभावात्॥ १५॥ साध्यहेतोः सामानाधिकरण्येनप्रत्यवस्थानं सामानाधिकरण्यसमा। इयमेवप्राप्तिसमेत्युच्यते। क्रियाहेतुगुणवत्वेनक्रियावत्वं किमितिसाध्यते क्रियावत्वेन क्रियाहेतुगुणवत्वं किमिति नसाध्यते। उभयोरविशेषात्॥ १६॥ पक्षेहेतोः साध्यप्रत्यवस्थानमसामानाधिकरण्यसमा। इयमेवाप्राप्तिसमा। आत्मन्यप्राप्तस्य क्रियाजनकनोदनाख्यसंयोगवत्व रूपहेतोः साध्यसाधकत्वंवाच्यं। अप्राप्तत्वादिति चेत्सर्वः सर्वं साधयति। अतः अयमेवहेतुःसाध्याभावं किमितिनसाधयेत्। साध्यमेवकुतःसाधयेत्। अत्रविनिगमकाभावात्॥ १७॥ साधनस्यानर्थक्यप्रसंगसमा। क्रियावत्वे क्रियाहेतुगुणवत्वंसाधनं। तत्रकिंसाधनं। नहिसाधनंविना कस्यचित्सिद्धिः। तत्रापिकिंसाधनमि

ति ॥१९॥ दृष्टांतांतरेण साध्याभावसाधनं प्रति दृष्टांतसमा। लोष्ठदृष्टांते क्रियावत्वं साधिते आकाशदृष्टांतेन निष्क्रियत्वं [illegible] भावः ॥१९॥ अनित्यत्वात्प्रत्यवस्थानाभावादुत्तरत्वम्। घटः अनित्यः जन्यैकत्वादित्यत्र यदि जन्यैकत्वं नित्यत्वं तत्र जन्यैकत्वोत्पत्तेः पूर्वं जन्यैकत्वाभावाच्चित्यत्वं। नित्यभेदः स्पष्ट एवेति ॥२०॥ अहेतुसमा। अहेतोः साध्यविपरीतसाधकहेतोः [illegible] समा। वायुः रूपवान् स्पर्शवत्वात्। वायुः रूपाभावः अचाक्षुषत्वात् ॥२१॥ वाक्यहेतोरभावेपि साध्योपलब्धिकथनं [illegible] शब्दोनित्यः [illegible] नुविधायित्वादुच्चारणवदित्यत्र प्रयत्नं विनापि वायुनोदनवशात् [illegible] रवा भंग जन्यस्य शब्दस्योपलब्धेर्न प्रयत्नानुविधायित्वं शब्देस्ति ॥२२॥ [illegible] भिमतस्य

पि यत्किंचित्सद्भावस्याभावसाधनमनुपलब्धिसमा यथाविद्यमानस्यापि जलस्य घटाद्यावर-
णवशाद्यथानुपलब्धिस्तथोच्चारणात्पूर्वं शब्दस्यावरणवशादनुपलब्धिरित्येवं मतं वादिना-
दूष्यते। यथावरणवशाच्छब्दे नोपलभ्यते तदा जलाद्यावरणमिव शब्दावरणमप्युपलभ्ये
तेति। अत्रोत्तरं। यदि भवद्भिरनुपलब्धितः शब्दस्यावरणं नाभ्युपेयते तदानुपलब्धेर
ज्य भावेनोपलब्ध्यात्मिन्धेतद्भावादावरणाभावात्सिद्धौ आवरणसिद्धिरिति ॥ २३ ॥ वा
ह्यरूढ हेतोरन्यकार्येण संभवोक्तिः कार्यसमा। घटादिवलब्धस्वरूपोत्पत्तौ जलादिव्यव-
वरणनिवृत्तौ चेत्युभयथापि प्रयत्नानुविधानदर्शनेन प्रयत्नानुविधायित्वस्य हेतोरावर- ॥ ७
रक निष्पत्तिरूपकार्यांतरसंभवाच्च शब्दस्यानित्यत्वेनियतहेतुः प्रयत्नानुविधायित्वमि
ति ॥ २४ ॥ अप्राप्तिपत्तिर्विभक्तिनिर्वा निष्पन्नस्यानिति गौतमसूत्रं। बुद्धेरप्रत्यक्षत्वा

स्वरूपतोनिग्रहस्थानं भवतीनिस्वज्ञापकं लक्षयतीति भाष्यं। अप्रतिपत्तिरज्ञानं। विप्रतिपत्तिर्विपरीतज्ञानं। तथाचाप्रतिपत्तिविप्रतिपत्त्यन्यतरत्वंनिग्रहस्थानमितिलक्षणं यद्यप्येतल्लक्षणजात्योरतिव्याप्तं। तथापितयोरर्थांतरादिनिग्रहस्थानेनंतर्भावाभावदोषः। छलत्वादिनापृथग्ज्ञानं शिष्यबुद्धिवैशद्यायेतिबोध्यं। तत्रप्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासन्यासः हेत्वंतरमर्थांतरं निरर्थकमविज्ञातार्थः अपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभाविक्षेपोमतानुज्ञापर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोपसिद्धांतोहेत्वाभासश्चेति द्वाविंशतिधा। प्रतिज्ञातार्थविरुद्धाभ्युपगमः प्रतिज्ञातार्थपरित्यागोवाप्रतिज्ञाहानिः। यथाशब्दः अनित्यः प्रत्यक्षत्वादित्यत्रसोयंगकारइत्यादिप्रत्यभिज्ञाबलात्परेणबाधउच्यतेचेत्तर्ह्यस्तु शब्दस्यनित्यत्वमित्यंगीकुर्वन्नित्यत्वप्रतिज्ञांजहाति

॥१॥ परोक्तदोषोद्दि धीर्षया पूर्व[illegible]क्तविशेषणवत्तया प्रतिज्ञातार्थकथनं प्रतिज्ञांतरं। शिक्षा- व्या.
दिकं गुणजन्यं [illegible] जन्यत्वे नसिद्धसाधनोद्भावने साधनवैकल्यगुणनिग्रहः॥
॥६८॥ दानं ॥ २॥ स्वोक्तसाध्यविशिष्टहेतुकथनं [illegible] धः। घटः नित्यः जन्यत्वेनोपलभ्यमा
नत्वात् ॥३॥ स्वोक्तार्थपरेणदूषिते तदपलापः प्रति[illegible]न्यासः। शब्दः आत्मगुणः ऐंद्रियक
दिस्थुक्ते परेण सामान्ये व्यभिचारउद्भावितेकेनोक्तमानेन शब्द इत्यपलापः॥ ४॥ परोक्तदो
षोद्दि धीर्षया हेतुकोटौ विशेषणांतरोप दानं हेत्वंतरं। पर्वतोमहानसिद्धो वन्ह्यभाववान् धूमा
भावादित्यत्र स्वरूपासिद्धौ परेणोद्भावितायां धूमेमहानसीयत्वविशेषणं ॥ ५॥ अर्थतः ॥६८॥
पयुक्तकथनमर्थांतरं। पर्वतेवन्हौसाध्ये धूमवत्वं हेतुर्भवतीत्युक्ते [illegible]तोर्थटि
भवतीति परस्मैपदीति॥ ६॥ अवयव [illegible] यवयोगो निरर्थकं यथाजवगउदशत्वा [illegible] ॥७॥स

भ्य [illegible]ातवाद्यबोधक शब्दप्रयोगः अविज्ञातार्थकं। क्लिष्टान्वयम [illegible]सित्यार्थक मित्यादि। नवं कवचं बधानेत्या[illegible]। नकाररहितं कवचं [illegible]॥८॥ परस्परा[illegible]न्वित प[illegible] समूहोऽपार्थकं। [illegible]टः पटः [illegible]त्यादि॥९॥ अवयवानां व्युत्क्रमेण कथनमप्र[illegible]कालं। [illegible]त्ता छब्दो नित्य इत्यादि॥१०॥ यत्किंचिदवयव शून्य[illegible]व [illegible]न्यूनं। घटोद्रव्यं [illegible]णकमान्यत्व विशिष्ट[illegible]त्। अत्रसत्तापदं न्यूनं॥११॥ अधिक हेत्वादि कथनमधिकं। घटः अ[illegible]दः कार्त्ताज्ज[illegible]त्वे-[illegible]दित्वान्मध्यम परिमाणवत्वात्॥१२॥ अनुवादं विनाकथितस्य पुनः कथनं पुनरुक्तं। नित्यः शब्दोनित्यः। पारिषदात्रिरभिहितस्यान[illegible] वादोननु भाषणं।१४॥ पारिषदा वि[illegible]तस्य-वा[illegible]दिना त्रिरभिहितस्य वाक्य[illegible]स्या बोधः अज्ञानं॥१५॥ उत्तरा[illegible]दोक्तं बुध्वाप्युत्तरस्या[illegible]र्ति व[illegible]न्यूनीं भावः अप्रतिभा॥१६॥ असंभवत्कालांतरकार्य व्यासंग[illegible]द्रव्यक[illegible]देदि

शेषः ॥ १७॥ स्वपक्षेदोषमनुद्धृत्य परपक्षेदोषाभिधानं मतानुज्ञा ॥१८॥ उद्भावनाक्षमत्वं च निग्रहस्थानानुद्भावनं वर्यनुयोज्योपेक्षणं ॥१९॥ निग्रहस्थानानवसरे तन्निग्रहस्थानाभिधानं निरनुयोज्यानुयोगः ॥२०॥ एकसिद्धांतमालंब्यकथा प्रवृत्तौ तद्विरुद्धसिद्धांतमालंब्योत्तरदानमपसिद्धांतः ॥२१॥ हेत्वाभासास्वनुमान परिच्छेदे निरूपिताः ॥२२॥ इति निग्रहस्थानानि ।

ज्ञाननिष्ठं प्रामाण्यंस्वतोग्राह्यं परतोग्राह्यंवेतिविचार्यते । तच्च प्रामाण्यं तद्वतितत्प्रकारकत्वरूपं । ज्ञानप्रामाण्यं तद्[illegible] ग्राहक यावज्ज्ञानग्राहक सामग्रीग्राह्यत्वं स्वतस्त्वं । ज्ञानेऽज्ञानत्वं ज्ञाननिष्ठा प्रामाण्यग्राहिका यावती ज्ञानग्राहिकानु व्यवसायादिरूपा [illegible] तद्ग्राह्यमित्यर्थः ॥ ६१॥ । यत्र प्रथमं गुंजापुंजे वन्हिभ्रमः । पश्चादिदं ज्ञानमग्नेरिति प्रमा । ततोद्वितीयमग्नेरयमिति प्रमा । तत्र तृतीय ज्ञानग्राह्यत्वस्यानुव्यवसायेनप्रामाण्ये सत्येपि तृतीय ज्ञानस्य व्यवसाय-